# कर्नाटकसंस्कृताध्ययनम्

## विद्वत्पत्रिका

(कर्नाटकसंस्कृतविश्वविद्यालयस्य शोधपत्रिका)

Vol. 6, No. 1 & 2, 2020

कर्नाटकसंस्कृतविश्वविद्यालयः

Karnāṭakasamskṛtādhyayanam
Vidvatpatrikā
*A Journal of*
*Karnataka Samskrita University*

ISSN : 2249-1104

Vol. 6, Issue 1 & II
October 2018

© Prasaranga, Karnataka Samskrita University

**Chief Editor**

Prof. K. E. Devanathan
(Vice Chancellor, KSU, Bangalore)

**Editor**

Prof. Shivani V.
(Director, Prasaranga, KSU, Bangalore)

**Review Committee Members**

Prof. Shrinivasa Varakhedi, (Vice Chancellor, KKSU, Nagpur)
Prof. Michael, (Gulbarga University)
Dr. Shivarajappa, (Mysore University)
Prof. Veeranarayana Pandurangi,
(Dean, Vedanta Faculty, KSU, Bangalore)
Prof. B. V. Venkataramana, (Dean, Shastra Faculty, KSU, Bangalore)

**Convenors**

Dr. Santosh Hanagal
Deputy Director, Prasaranga
Dr. Govinda B.
Deputy Director, Prasaranga
Dr. Mallanagowda S.
Assistant Director, Prasaranga

# विषयसूची


## Volume 6, Issue 1 2

1. वेदान्तसूत्राणां कुत्र तात्पर्यम्?

   श्रीनिवासः वरखेडी . . . . . . . . . . . . . . . . . . . . 4

2. न्यायदर्शनविकासे कतिपयसंभावनाः

   वीरनारायण पाण्डुरङ्गी . . . . . . . . . . . . . . . . . . . 15

3. स्थानिवत्सूत्रार्थविमर्शः

   स्वामी जपसिद्धानन्दः . . . . . . . . . . . . . . . . . . . 24

4. सज्जनेन्द्रप्रयोगकल्पद्रुमे व्याकरणांशाः

   नागरत्ना हेगडे . . . . . . . . . . . . . . . . . . . . . 43

5. तन्त्रयुक्तिः - प्राचीनभारतीयशास्त्रग्रन्थप्रणयनपद्धतिः

   म. जयरामः . . . . . . . . . . . . . . . . . . . . . . 55

6. न्यायमतरीत्या कालः

   भास्करभट्टः जोशि . . . . . . . . . . . . . . . . . . . . 70

7. दैवधातुपाठोक्ता ज्ञाधातु-क्षिधातुविषयिणी समीक्षा

   उदयन हेगडे . . . . . . . . . . . . . . . . . . . . . . 75

8. शब्दस्वरूपविज्ञानम्

   रामकृष्णभट्टः के . . . . . . . . . . . . . . . . . . . . 85

9. कठमुण्डकोपनिषदुक्तयोगविचारः

   श्रुतिः एच्. के. . . . . . . . . . . . . . . . . . . . . 96

10. खण्डकाव्यलक्षणविमर्शः

    आर्. तिम्मण्णः . . . . . . . . . . . . . . . . . . . . . 103

## शब्दस्वरूपविज्ञानम्

रामकृष्णभट्टः के

तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः। आकाशाद्वायुः"[1] इत्यादिना जगदुत्पत्तिं ब्रुवती श्रुतिः "अन्नात्पुरुषः"[2] इत्याह। पश्वादीनां सर्वेषामपि प्राणिनामन्नरसविकारत्वे समाने कस्मात् पुरुष एवेह गृह्यते - इत्याशङ्क्य 'प्राधान्यात्' इति समाहितम् भाष्यकारैर्ब्रह्मवल्लीभाष्ये। "किं पुनः प्राधान्यम्" इति जिज्ञासायां "कर्मजिज्ञासाधिकारः" इति च तैरेवोक्तम्। पुरुषशब्देनात्र मनुष्यो गृह्यते। स हि विज्ञातं वदति विज्ञातं करोति। तस्मात् पुरुषस्य कर्मज्ञानयोरधिकारः। शक्तत्वात् अर्थित्वाच्च। ज्ञानपूर्वकत्वात् कर्मणः, ज्ञानस्य कर्मणोपि प्राधान्यम्। ज्ञानञ्च वर्णात्मकशब्दादेव जायते वर्धते चेति सर्वसंप्रतिपन्नम्। अत एव शब्दो ज्योतिः, सर्वार्थप्रकाशकत्वात्। सूर्योपि यन्न प्रकाशयति तत् प्रकाशयति शब्दः। तस्मात् शब्दस्वरूपविज्ञानार्थोयमारम्भः।

शब्दादर्थं पतिपद्यामहे इति सर्वेषामनुभवः। तस्मादस्ति शब्दे काचिदर्थबोधकताशक्तिरिति निश्चिनुमः। शक्तेराश्रयः कः, यस्य च श्रवणादर्थबोधः इति विचारस्तु प्रकृतः, शब्दस्वरूपनिर्धारणे प्रवृत्तत्वात्। शब्दो नाम वर्णात्मको वर्णसमुदाय इत्याह। नेयमुक्तिः समञ्जसा वर्णसमुदायस्य युगपत् अनुपलब्धेः। स हि घटपटादिवत्

[1] आनन्दवल्ली -१ [2] आनन्दवल्ली -१

शब्दः क्वचिदुपलभ्यते। क्रमेण वर्णानुच्चार्य भवत्सम्मत शब्दस्य निष्पाद्यमानत्वात्। वर्णानामाशुविनाशित्वेन द्वितीयवर्णोच्चारणवेलायां प्रथमस्याभावात् अन्त्यवर्णोच्चारणसमये पूर्वेषामभावात् वर्णसमुदायस्य अनुपलम्भ एव। न च अन्त्यवर्णोच्चारणात्परं सर्वेषां युगपत् स्मरणं सम्भवतीति वाच्यम्। येन क्रमेण उच्चारणं तेन क्रमेणैव स्मरणं भवतीति नियमाभावात्। नदी-दीन, यवः-वयः, तपन-पतनादिषु व्यत्ययेन स्मरणे अर्थभेदप्रसङ्गात्। किञ्च श्रूयमाण-ध्वनीनामुच्चैस्त्व-नीचैस्त्व-मृदुत्व-कठोरत्वादिभिरसंख्यानभेदवत्त्वेन शाब्दबोधे अव्यवस्थाप्रसङ्गः। तथाहि मृदुध्वन्युच्चारितो घटशब्दः कलशं बोधयतीति यस्य शक्तिग्रहः, तस्य कर्कशध्वन्युच्चा-रितघटशब्देन बोधो न स्यात्। किञ्च वर्णानामाशुविनाशित्वेन वर्णसमुदायाभावात् अर्थबोधकताशक्तेराश्रयस्यैव अनुपपत्तिः। उच्चारणभेदात् शब्दभेदाच्च 'स एवायं शब्दः' इति प्रत्यभिज्ञाया अप्यनुपपत्तिः। लिख्यमानस्तु लिपिरूपरेखाविशेषः शब्दं स्मारयति, नत्वसौ शब्दः। दृश्यत्वाच्च। न हि शब्दो दृश्यते।

किञ्च वर्णानां क्रमेणोच्चारणेपि यौगपद्येन सर्वेषां श्रवणादर्थबोध इति यदुक्तं तदयुक्तम्। यौगपद्येन श्रवणाभावात् तज्जन्यसंस्काराभावेन यौगपद्यस्मरणासम्भवात्। एकैकवर्णश्रवणजन्यसंस्कारस्य पृथक्त्वेन, पृथगेव वर्णानां स्मरणं, न तु यौगपद्येन। ननु काण्डशाखापर्णादीनां समुदायो वृक्षः। तथापि वृक्षस्य युगपत् स्मरणं सम्भवति। तथा वर्णसमुदायो युगपत् स्मर्यत इति चेत् वैषम्यात्। अवयवसमुदायोपि वृक्षः युगपत् दृश्यत इति वृक्षदर्शनजन्यसंस्कारात् वृक्षस्य स्मरणं युज्यते। वर्णसमुदायस्तु युगपन्न श्रूयत इति वैषम्यम्।

एवं तर्हि कः शब्दः? कश्च अर्थबोधकतारूपशक्त्याश्रयः? उच्यते। उच्चारितैर्ध्वनिभिः वर्णपदाभिधेयैरभिव्यज्यते कश्चिदखण्डः शब्दः। स चोच्चारितध्वनिरूषितो बोधयत्यर्थम्। स एवार्थबोधकताशक्त्याश्रयः। सोप्यखण्डः शब्दः स्फोट इत्यभिधीयते वैयाकरणैः। स्फुटत्यर्थः अस्मादिति स्फोटः इति व्युत्पत्तिः।

ननु ये वर्णाः स्फोटं व्यञ्जयति त एव वर्णाः अर्थं बोधयन्ति इति किमर्थोयं स्फोटः? तद्धेतोरेव तद्धेतुत्वे मध्ये किं तेन इति न्यायात्। नैतदेवम्। अभिव्यञ्जनाभिधानयोर्भेदात्। श्रूयमाणा वर्णा आशुविनाशिन इत्युक्तम्। उच्चारितैर्वर्णैः रत्नपरीक्षन्यायेन क्रमेण अभिव्यञ्जनं भवति स्फोटस्य। ततो युगपदर्थबोधः। स्फोटानाम् आश्रयणे तु युगपदर्थो न बुध्येत। क्रमेणार्थबोधो न कस्यापीति विशेषः। किञ्च 'अयमेकः शब्दः। शब्दादर्थं प्रतिपद्यामहे' इत्यनुभवः सर्वेषां न तु "वर्णैरर्थं प्रतिपद्यामहे" इति। यत्तु तार्किकाः स्फोटमनङ्गीकुर्वन्तो ध्वनिभिरेवार्थबोध इति मन्वते, तत्तु अर्धजरतीयन्यायमनुसरति। उत्पत्तिवादिनस्ते हि तन्तुभिर्वस्त्रमन्यदुत्पद्यते तन्तुभ्योतिरिक्तमिति वदन्ति। किमर्थं वस्त्रमन्यदुत्पद्येत? तन्तुसमूह एव वस्त्रम्। इमे तार्किका तन्तुसमूहं धारयामो न तु वस्त्रमिति ब्रुवन्तु।

मीमांसकाः पुनः नित्यं वर्णं सङ्गिरन्तः "ध्वनिना नित्यो वर्णः अभिव्यज्यते। पिपीलिकापङ्क्तिरिव उच्चार्यमाणाः वर्णा एव वाचका इति ब्रुवते। नित्यत्वेपि वर्णानां पिपीलिका पङ्क्तिरिव वर्णसमूहो युगपत् ज्ञानगोचरो न भवतीति पूर्वोक्तो दोषः समानः। वर्णस्य नित्यत्वे व्यङ्ग्यत्वे च वर्णस्फोट एव सः। वर्णस्फोटः

स्वीक्रियते न तु पदस्पोटः इति तु च्छलमात्रम्। न तु विद्वन्मनोहरम्। यत्तु श्रीशङ्कराचार्यैः सूत्रभाष्ये “वर्णा एव वाचका इति भगवानुपवर्षः” इत्युक्तम्। तत्तु उपवर्षाचार्यमतस्य अनुवादः, न तु स्फोटवादस्य खण्डनम्। शास्त्रकारा हि ग्रन्थेषु मतान्तराप्यनुवदन्ति प्रपञ्चार्थम्। न तावता तेषु मतेषु नैर्भर्यं तेषाम्। ब्रह्माद्वैतवादिनां श्रीशङ्कराचार्याणां स्फोटवादस्य मण्डने खण्डने वा न लाभो न च हानिः। उपवर्षाचार्याः मीमांसकाः। किं मीमांसकसिद्धान्तः संमतो भगवत्पादानाम्? अथवा पुनरस्तु स्फोटवादोस्माकं प्रस्थानान्तरम्। अन्यप्रस्थानेन न दोषायेति न किञ्चिदेतत्।

ननु स्फोटादेवार्थबोधो न तु वर्णेभ्यः इति अङ्गीकारे शब्दानां बहुत्वात् असंख्याता भवन्ति स्फोटाः इति चेत्। इष्टापत्तिः। एवं हि देशीय विदेशीयभाषास्वपि स्फोटादेव अर्थप्रतिपत्तिरिति वक्तव्यं भवति, युक्तिसाम्यादिति चेत्। इष्टापत्तिरित्येवोत्तरम्। सर्वभाषास्वपि वर्णघटितत्वात् शब्दानां तत्तद् वर्णाभिव्यङ्ग्यादखण्डात् स्फोटादेव अर्थं प्रतिपद्यन्तो जना इत्यविशेषः। ननु शब्दब्रह्मवादी भवान्। शब्दाद्वयवादी च। स्फोटश्च शब्दः। तथाच अनन्तानि ब्रह्माणि। अद्वयवादस्य मूले कुठरश्चेत्यहो हास्यास्पदं ते दर्शनम्। शब्दाद्वयवादिनामयं सिद्धान्तो दरीदृश्यते, जाज्वल्यते च सर्वदर्शनानां मध्ये वेदप्रामाण्यात्, पतञ्जल्यादिमुनिसम्मतत्त्वाच्च।

ओमिति ब्रह्म। ओमितीदं सर्वम्।[3] इति श्रुतेः ओम् इत्येतत् शब्दब्रह्म। तदेव महास्फोटः। स एवानिर्वाच्यतया मायया घटपटवृक्षाद्यर्थरूपेण विवर्तते। ये च श्रवणप्रत्यक्षविषया वर्णाः ते

---

[3] शिक्षावल्ली – ८

सर्वे शब्दब्रह्मणो विवर्ताः। तैरुपाधिभिरेक एव महास्फोटः विभिन्न इव प्रतीयमानः घटपटाद्यर्थजातं प्रकाशयति। न च साङ्कर्यम्। उपाधिभेदादर्थभेदोपपत्तेः। "सर्वं खल्विदं ब्रह्म" इत्यादि श्रुतिवचने जाग्रत्यपि यथा मायकल्पितासंख्यैर्द्रव्यैः नानाविधो लोकव्यवहारः ब्रह्माद्वैतवादिनां, तथैव कल्पितवर्णोपाधिभिर्विभिन्नत्वेन प्रतीयमानैः शब्दैः स्फोटाख्यैर्लोकव्यवहारोनुगम्यते।

अकारादयो वर्णाः द्रव्याणि न तु गुणाः। ते च स्थानप्रयत्न-भेदादुच्चारणक्रियया निष्पाद्यन्ते। यत्तु "आकाशः शब्दगुणः" इत्येवं शास्त्रे व्यवहारः। तत्र शब्दशब्देन ध्वनिसामान्यं गृह्यते, न तु वर्णः। लोके तु ध्वनिवर्णयोरभेदेन व्यवहार इति ध्वनिशब्देन वर्णे गृहीतेपि न दोषः। लोकप्रतिपत्त्यर्थमेव शास्त्रप्रवृत्तेः। एकस्य महास्फोटस्य स्वीकारादेव 'सर्वे सर्वार्थवाचकाः' इत्युक्तेरुपपत्तिः। एकस्यैव तस्य उपाधिभिः सर्वशब्दरूपत्वेन सर्वार्थवाचकत्वस्योपपादनात्। "सर्वे सर्वार्थवाचका इति तु योगिदृष्ट्या" इति व्याख्यातारः। योगिनामपि कथमेतदुपपद्यते? न हि योगिनो भ्रान्ताः। तस्मादत्र योगिनो नैव पातञ्जलाः। किन्तु शब्दब्रह्मविदो वैयाकरणा इति बोध्यम्।

यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योध्यमृतात् सम्बभूव। समेन्द्रो मेधया स्पृणोतु। अमृतस्य देव धारणो भूयासम्" इति शिक्षा।[4] अत्र श्रीशाङ्करभाष्यम् - यः सोङ्कारः छन्दसां वेदानां वृषभ इव वृषभः, प्राधान्यात्। विश्वरूपः सर्वरूपः सर्ववाग्व्याप्तेः। "तद्यथा शङ्कुना" इति श्रुत्यन्तरात्। अत एव वृषभत्वम् ओङ्कारस्य। छन्दोभ्यः वेदेभ्यः, वेदा ह्यमृतम्। तस्मात् अमृतात् अधि

---

[4] शिक्षावल्ली - ४.१

सम्बभूव। लोकदेववेदव्याहृतिभ्यः सारिष्ठं जिघृक्षोः प्रजापतेः तपस्यतः ओङ्कारः सारिष्ठत्वेन प्रत्यभादित्यर्थः। न हि नित्यस्य ओङ्कारस्य अञ्जसैवोत्पत्तिरवकल्पते। सः एवं भूत ओङ्कारः इन्द्रः सर्वकामेशः परमेश्वरः मा मां मेधया स्पृणोतु प्रीणयतु बलयतु वा। प्रज्ञाबलं हि प्रार्थ्यते। अमृतस्य अमृतत्वहेतुभूतस्य ब्रह्मज्ञानस्य तदधिकारात्; हे देव धारणः धारयिता भूयासम् भवेयम् इति। तत् सर्वमस्मदनुकूलम्। यदेतस्य उपास्यत्वेन योजनं भाष्ये, तदपि न विरुध्यते शब्दब्रह्मोपासकानाम् अस्माकम्।

उपर्युक्तभाष्ये 'सर्ववाग्व्याप्तेः' इत्यस्य विवरणं वनमालायाम् - शब्दमात्रे कृत्स्नस्याभिधीयस्यान्तर्भावं "तस्य वाक्तन्ति" इत्यादि श्रुत्युक्तं सिद्धं कृत्वा तस्य सर्वशब्दात्मकत्वे प्रमाणमाह - तद्यथेति। तद्यथा शङ्कुना सर्वाणि पर्णानि संतृण्णानि एवमोङ्कारेण सर्वावाक् संतृण्णा इति श्रुत्यन्तरम्।

एवञ्च सर्वमभिधानमभिधेयञ्च ओङ्कारेण शब्दब्रह्मणा व्याप्तमिति स्पष्टम्। अभिधानं शब्दः। अभिधेयमर्थः। शब्दार्थरूपं सर्वं नान्यत् किञ्चिदस्ति। सर्वमिदं जगत् शब्दब्रह्मणो विवर्तः। साधुखल्वेतदुक्तं तत्रभवता भर्तृहरिणा -

> अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
> विवर्ततेर्थभावेन प्रक्रिया जगतो यतः ॥[5]

शिक्षायाम् पञ्चमानुवाके "भूर्भुवःसुवरिति वा एतस्तिस्रो व्याहृतयः" इत्युक्त्वा माहाचमस्येन दृष्टा मह इति चतुर्थो व्याहृतिः उदाहृता।

ततश्च "तद्ब्रह्म। स आत्मा" इत्युक्तम्। इदमन्यासां तिसृणामपि व्याहृतीनामुपलक्षणम्। एवं चतसृणामपि व्याहृतीनां ब्रह्माभिन्नत्व-प्रतिपादनं शब्द एव ब्रह्म इत्यर्थं द्रढयितुमेवेति द्रष्टव्यम्।

षष्ठानुवाके च मह इति ब्रह्मणि इति वाक्ये मह इति पर-ब्रह्मैवोपास्यमिति वनमालायां निर्णीतम्। सादृश्यात् सामीप्याच्च शब्दब्रह्मणः मह इति शब्दरूपव्याहृतेरेवोपास्यत्वमुक्तं श्रुत्या, नतु सालग्रामादेः शिलारूपस्य इत्यपि द्रष्टव्यम्। पुनरप्य-ष्टमेनुवाके "ओमिति ब्रह्म। ओमितीदं सर्वम्" इत्यभिहितम्। अत्र श्रीशङ्कराचार्याः - ओम् इत्येतच्छब्दरूपं ब्रह्म इति मनसा धारयेत्। यतः ओमितीदं सर्वम्। सर्वं हि शब्दस्वरूपं ओङ्कारेण व्याप्तम्। "तद्यथा शङ्कुना" इति श्रुत्यन्तरात्। अभिधानतन्त्रं हि अभिधानम् इत्यतः इदं सर्वमोङ्कार इत्युच्यते" इति। अत्र वनमाला - अभिधेयजातस्य अभिधानाधीनसिद्धिकत्वात् वाच्यवाचकयोः तादात्म्यस्वीकाराच्च अभिधेयजातस्याभिधानेन्तर्भावः। इति।

अत्र ब्रूमः। विवर्तानां विकाराणां च प्रकृतावन्तर्भावः। घटशरावादीनां विकाराणां च प्रकृतौ मृत्तिकायामन्तर्भावः। रज्जुसर्पस्य रज्जावन्तर्भावः। प्रकृतिर्व्यापिका। विकृतिस्तु व्याप्या। अभिधानव्याप्यमभिधेयम्। शब्दस्य विवर्तः अर्थः। अर्थस्य शब्देन्तर्भावः। अत्र व्यापकत्वं बहुदेशवृत्तित्वम्। व्याप्यत्वम् अल्पदेशवृत्तित्वम्। यत्र यत्र अर्थः तत्र तत्र शब्दः इति शब्दो व्यापकः। यत्र यत्र शब्दः तत्र तत्र अर्थः इति नास्ति व्याप्तिः। हुं फट् ह्रां ह्रीं ह्रूम् इत्यादौ अनर्थकनिपातेषु च अर्थस्याभावात्। अत एव अभिधानव्याप्यत्वमभिधेयस्य। एवञ्च अभिधानकृतविकारा इमे पदार्था

इति सिद्धम्। पदार्थ इति रूढः शब्दोपि व्यञ्जयति पदस्य विकारा इति। पदस्य अर्थाः पदार्थाः। "अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते" इति हरिः घटः सन् इत्यादौ सदर्थो ब्रह्म अव्यभिचारेण भासते ब्रह्माद्वैतवादिनां तथास्माकं शब्दब्रह्मवादिनां शब्दोपि भासते पदार्थज्ञाने। अत एव केषाञ्चित् शब्दानां प्रयोगे काव्येषु अश्लीलत्व-रूपशब्ददोषो न त्वर्थदोषाः काव्यमीमांसकानाम्।

अष्टमानुवाके च श्रुतिराह – ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति। ब्रह्मैकोपाप्नोति इति। अत्र श्रीशाङ्करभाष्यम् – ब्रह्म परमात्मानम् उपाप्नवानीति आत्मानं प्रवक्ष्यन् प्रापयिष्यन् ओमित्येवाह। स च तेनोङ्कारेण ब्रह्मप्राप्नोत्येव इति। अनेन भाष्येण ओङ्काररूपं ब्रह्म ब्राह्मणः प्राप्नोति इति लभ्यते। प्राप्तिश्च ओङ्काररूप ब्रह्मणा सायुज्यमेवेत्यवधेयम्।

ननु ओङ्कार इत्यत्र वर्णात्कार इति कारप्रत्ययः। ओमिति वर्ण इत्यभ्युपेयम्। स च श्रोत्रेन्द्रियग्राह्यः प्रत्यक्षः। ब्रह्मणः प्रत्यक्षत्वं न केनाप्यन्यैरभ्युपगतम्। भवदभ्युगतं ब्रह्म किं प्रत्यक्षम्? मैवम्। ओङ्कारेणाभिव्यज्यमानो महानादो ब्रह्म। स एव महास्फोटः परमेश्वरः। स च न श्रवणगोचरः। वाच्यस्यापि प्रत्यक्षत्वनियमो नास्ति। किं पुनर्व्यङ्ग्यस्य। ननु मृदङ्गताडनादिभिरुत्पद्यमानो नादः श्रूयते? न। विशेषात्। को विशेष इति चेत्। ओङ्कारेण अभिव्यङ्ग्यत्वमेव विशेषः। उत्पद्यमाना ध्वनयः श्रवणगोचरा इत्यस्माभिरप्यङ्गीकृतमेव। महानादविशेषोयं न श्रवणगोचर इति न काचिदनुपपत्तिः। ओमित्येकाक्षरं ब्रह्म इति श्रुतिः। एकमक्षरम् इति कर्मधारयसमासः। पूर्वकालैकसर्व..." इत्यादिसूत्रेण समासः।

एकम् = अद्वितीयम्। न क्षरतीत्यक्षरम्। शाश्वतमित्यर्थः। शाश्वतमद्वितीयमोमिति शब्दगम्यं महानादस्वरूपं ब्रह्मेति वाक्यार्थः। ननु एकमक्षरं यस्मिन्स ओं शब्द इति बहुव्रीहिः। ओङ्कारे शब्दे अ उ म् इत्यक्षरत्रयसत्वात्। तदुक्तम्- अकारश्च तथोकारो मकारश्चाक्षरत्रयम्। एतास्तिस्रः स्मृता मात्राः सत्त्वराजसतामसाः॥ इत्याद्यागमग्रन्थविरोधात्। ब्रह्मणः शब्दरूपत्वादेव अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा" इति स्मृतिः। वाचा विरूपनित्यया, वागेव विश्वा भुवनानि जज्ञे इत्यादिश्रुतयश्च शब्दब्रह्मणो माहात्म्यमाचक्षते। सर्वेषां वेदानामोङ्काररूपत्वेन "सर्वे वेदा यत्पदमामनन्ति.." इत्याद्युपपद्यते। नच भवद्रीत्या महानादस्य शब्दब्रह्मणो जडत्व- माशङ्कनीयम्। तस्य चैतन्यरूपत्वात्। वेदाभिन्नत्वेन ओङ्कारेणाभिन्नं हि शब्दब्रह्म। तच्च आत्मविज्ञानं चैतन्यम्। श्रीशङ्करा- चार्यैरपि ब्रह्मवल्ल्यास्तृतीयानुवाकभाष्ये "मनोवृत्त्युपाधि- परिच्छिन्नं आत्मविज्ञानं मन्त्राः" इति स्पष्टमेवोक्तम्। आत्मविज्ञानञ्च चैतन्यमेव।

किञ्च श्रीगणेशाथर्वशीर्षे गणेशदेवतायाः स्वरूपम् शब्दतत्त्वमेवेति स्फुटमभिहितम्। तथाहि - श्रीगणेशदेवतामुद्दिश्यैवमुच्यते - "त्वमेव प्रत्यक्षं ब्रह्मासि" एवकारो भिन्नक्रमः। त्वं प्रत्यक्षं ब्रह्मैवासि इति। शब्दब्रह्म ओङ्कारो हि श्रवणप्रत्यक्षः। ननु महानादस्य शब्दब्रह्मणः ओङ्कारेण अभिव्यङ्ग्यत्वमुक्तं भवतैव। ननु ओङ्कारस्यैव शब्दस्य ब्रह्मत्वमिति चेत्। सत्यम्। ओमिति ब्रह्म, ओमित्येकाक्षरं ब्रह्म इत्यादिभिः श्रुतिभिः, स्मृतिभिः तस्य वाचकः प्रणवः इति योगसूत्रेण च शब्दब्रह्मणः गणेशस्य प्रधानं प्रतीकमोङ्कार

इत्यवधारणात् शब्दार्थयोरभिन्नत्वाच्च "त्वमेव प्रत्यक्षं ब्रह्मासि" इत्युक्तम्। नहि सलगामादेः प्रतीकस्य ईश्वराभिन्नत्वं क्वचिदपि श्रुतं स्मृतं वा। तस्मात् सुष्ठूक्तं त्वं ब्रह्मासीति। त्वं चत्वारि वाक्-परिमिता पदानि' इति कण्ठरवेणोक्तः शब्दाभेदः श्रीगणेशस्य। किञ्च त्वं मूलाधारस्थितोसि नित्यमिति वचनमप्यस्मदनुकूलम्। परा वाङ्मलचक्रस्था इत्यादिवचनात्। वाङ्मयस्त्वं चिन्मयः त्वं वाग्रूपस्त्वं चिद्रूपेत्यर्थः। स्वार्थे मयट्। तत्प्रकृतवचने मयट् इति सूत्रात्।

शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति - इत्यस्यायमर्थः। शब्दब्रह्मसमस्तवाचां प्रधानभूते ओङ्कारे निष्णातः परिनिष्ठितचित्त-संस्कारस्तत्स्वरूपं जानन् पुरुषः परंब्रह्म ओङ्काराभिव्यङ्ग्यं महानादं महास्फोटाख्यं ब्रह्म अधिगच्छति इति। अत एव "एकः शब्दः सम्यग्ज्ञातः सुष्ठुप्रयुक्तः स्वर्गे लोके कामधुग् भवतीति महाभाष्यकारः। सम्यग् ज्ञातः ओमितीदं सर्वम् अहं शब्दब्रहम इति शब्दतत्त्वविज्ञानेन ज्ञातः। सुप्रयुक्तत्वञ्च व्याकरणशास्त्रेण शिक्षया च परिष्कृतबुद्ध्या प्रयुक्तत्त्वम्। एतेन सिद्धमेतत् - यत् ब्रह्माद्वैतवादिनोपरब्रह्मेत्याचक्षते शब्दब्रह्म, तदेव अस्माकं परब्रह्म। न चोङ्कारः शब्द एव परब्रह्मेति भ्रमितव्यम्। किन्तु तदभिव्यङ्ग्यो महास्फोट एव तदिति वेदितव्यम्। महानादः, अनाहतनादः - इत्यपि तस्य शास्त्रेषु व्यवहारः। तस्य वाचकः प्रणवः इति योगसूत्रे वाचक इत्यस्य व्यञ्जनया बोधक इत्यर्थः। "यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह" इति श्रुतेः। दुन्दुभ्यादावाहन्यमाने श्रूयमाणो ध्वनिराहतनादः। अयमनाहतनादः स्वतःसिद्धः स्वयंप्रकाशः योगिभिरेव गम्यमानः।

घटपटादिपदेषूच्चारितेषु तदभिव्यङ्ग्यः तद्वर्णरूषितः स्फोटः एवार्थबोधं जनयति सूक्ष्मवेदिनां न तु अज्ञानिनाम्। यथा ब्रह्माद्वैतवादिनां मते घटपटादयोर्थाः ब्रह्मैव सन्तः जलाहरणादिक्रियाभेदं जनयन्ति उपाधिभेदात्। अयञ्च विवर्तवादः अन्या सर्वापिप्रक्रिया मायासहकारेण ब्रह्माद्वैतवादिनामिव नेया। भगवता भर्तृहरिणा सुष्ठूक्तम्-

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेर्थभावेन प्रक्रिया जगतो यतः ॥ इति ॥

## परिशीलितग्रन्थसूची


1. अष्टाध्यायी, चौखम्बासंस्कृतप्रतिष्ठान, दिल्ली, १९९२
2. वैयाकरणसिद्धान्तकौमुदी, चौखम्बासुरभारतीप्रकाशन, वाराणसी, १९९१
3. व्याकरणमहाभाष्यम्, चौखम्बासंस्कृतप्रतिष्ठान, दिल्ली, १९९१
4. वाक्यपदीयम्, विश्वविद्यालयमातृकाग्रन्थालयः, तिरुवनन्तपुरम्, १९४२
5. काशिका, तारा बुक एजेन्सी, वाराणसी, १९९४
6. शब्दकौस्तुभः, चौखम्बासुरभारतीप्रकाशन, वाराणसी, १९९७
7. उपनिषद्भाष्यम्, गीताप्रेस, गोरख पुर, १९९३
8. तैत्तिरीयोपनिषत्, श्रीरामकृष्णमठः, वेङ्गलूरु, २००६
9. श्रीगणपत्यथर्वशीर्षोपनिषत्, श्रीरामकृष्णमठः, वेङ्गलूरु, २००२
10. वैयाकरणभूषणसारः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०१२

ॐ

ISSN 2250-1711

सत्यं ज्ञानमनन्तम्

# Journal of Veda Samskṛta Academy

Recognised in the UGC-CARE L[illegible]

A National Peer-Reviewed Research [illegible]al

विश्वविद्यालय–अनुदान–आयोगेन केर सूच्यां मा[illegible]

मूल्याङ्किता राष्ट्रियसंशोधनपत्रिका

Volume : XVIII

July to December - 2021

*Edited by the Director :*

**Dr. Gopalkrishna Hegde**

Jyotishashastra-Dharmashastra Vidwan

**VEDA SAMSKRITA ACADEMY (R.)**

Kalkod Road, Hegde - 581330, KUMTA, Uttara Kannada, Karnataka.

# विषयसूची
## CONTENTS


सम्पादकीयम् 8-9

Prologue 10-11

ಮೊದಲಮಾತು 12–14

1. इन्द्रियविमर्शः 1-10
–डा. भास्कर भट्टः जोशि (बेङ्गळूरु)
2. स्कन्धत्रयोपेतं ज्योतिषम् 11-20
–डा. कुमारसुब्रह्मण्य भट्ट ए. (मङ्गळूरु)
3. अलङ्कारस्य काव्यशास्त्रीयसमीक्षा तस्य सन्निवेशश्च 21-24
–रमेशचन्द्र बरमोला (मुम्बई)
4. हस्तलेखशास्त्रपरिचयः 25-29
–डा. रामकृष्ण भट्ट के. (बेङ्गळूरु)
5. क्रियायाः स्वरूपविमर्शः 30-38
–डा. पि.आर्. अर्चना कारन्त (बेङ्गळूरु)
6. 'कुरु भुङ्क्ष्व' तत्ववाद–भगवद्गीतयोः कर्मजिज्ञासा 39-48
–डा. गौतम आर्. (मणिपाल)
7. पुराणानि प्रति श्रीमध्वाचार्यस्य योगदानम् 49-56
–डा. एस्. आनन्दतीर्थः (मणिपाल)
8. व्याप्तिस्वरूपे साध्याभावाधिकरणवृत्तित्वसामान्याभावविचारः 57-64
–डा. वि. वि. एस्. आर्. लक्ष्मीः (बेङ्गळूरु)
9. द्वितीयहेत्वाभाससामान्यलक्षणानुगमपरिष्काराः 65-71
–डा. के.ई.श्रीवेङ्कटनाथन् (बेङ्गळूरु)
10. अवधानकलाङ्गभूतायाः निषिद्धाक्षर्याः समग्रं समीक्षणम् 72-81
–डा. रामकृष्ण पेजित्ताय ( एर्नाकुलम्)
11. योगदर्शने ईश्वरप्रणिधानोपायेषु शतरुद्रीयस्य प्राशस्त्यम् 82-91
–विद्वान् वेङ्कट बथुल (बेङ्गळूरु)
12. अद्वैताधुनिकमतानुरोधेन चैतन्यचिन्तनम् 92-101
–डा. आर्. सुरेश (मैसूरु)

Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XVIII : July to December – 2021

# हस्तलेखशास्त्रपरिचयः

डा. रामकृष्ण भट्टः. के
सहायकप्राध्यापकः, हस्तप्रतिशास्त्रविभागः
कर्नाटकसंस्कृतविश्वविद्यालयः, बेङ्गलूरु

भारतवर्षमिदं ज्ञानसम्पदा शोभितं सर्वत्र गुरुत्वेन च राराजते । तद्धेतुश्च अत्रत्य ज्ञानसम्पत् लौकिकश्च सम्पत् । अत्र च विद्या चतुःषष्ठिभेदात्मिका कला अपि तावत्य एव आसन् । एतासां सर्वासाम् अध्यापनं विना ग्रन्थं श्रवणेनैव माध्यमेन बहुकालपर्यन्तमप्यभूत् । सर्वासां विद्यानां संरक्षणं केवलं श्रवणादिना नैव शक्या इति तेषां संरक्षणाय ब्रह्मा सृष्टेरादावेव लिपिं ससर्ज[१] । अथ च वेदे गायत्रिया परिलिखतीति[२]लेखनकलाया उल्लेखो दरीदृश्यते । स्मृतिषु[३] पुराणेषु तन्त्रग्रन्थेषु[४] काव्येषु[५] च लेखन कलाविचारः उल्लिखितो वर्तते । अपि च श्रूयते अग्रहारेषु गुरुकुलेषु चैत्य विहारेषु मन्दिरेषु प्रासादेषु ज्ञानसम्पदायुताः तालभूर्जादिषु लिखिता हस्तप्रतयोऽ भूवन्निति । तैर्विना अग्रहाराणि आश्रमाणि च देवेनरहितदेवालयवत् परिगण्यते स्म । विद्वांसः स्वलिखितान् लेखितान् वा हस्तप्रतिविशेषान् शिष्यैः लिपिकारैर्वा प्रतिलिपिं कारयित्वा विद्वदन्तरं प्रेष्यते स्म । स च विद्वान् तं ग्रन्थं पठित्वा तदुपरि टीकां व्याख्यानं खण्डनं वा विधाय प्रतिलिपिं कारयित्वा

---

१. नाकरिष्यद्यदि ब्रह्मा लिखितं चक्षुरुत्तमम् ।
तत्रोयमस्य लोकस्य नाभविष्यच्छुभागतिः ॥ नारदस्मृतिः - ४.७० ।

२. कृष्णयजुर्वेदे -पञ्चमकाण्डप्रथमप्रश्ने तृतीयानुवाके

३. लिपिसिचिह्वश्च - अष्टाध्यायी - ३-१-५३

४. मुद्रालिपिः शिल्पलिपिर्लिपिर्लेखनिसम्भवाः ।
गुण्डिकाघुणसम्भूता लिपयः पञ्चधा स्मृताः ॥ वाराहीतन्त्रम् ।

५. अयं दरिद्रो भवितेति वैधसीं लिपिं ललाटेऽर्थिजनस्य जाग्रतीम्।
मृषां न चक्रेऽल्पितकल्पपादपः प्रणीयदारिद्रदरिद्रतां नलः॥
नैषधीयचरितम्१-१५॥

प्रेषयति स्म इति । एताश्चैवंविधा हस्तप्रतयः भूर्जपत्रेण तालपत्रेण वा युता भवन्ति । आबहोः कालीनं पुरातनश्चेदमिति कृत्वा अस्याः संरक्षणं अवश्यमेव कर्तव्यम् । यदग्रेपि ज्ञानस्य प्रसारणमिष्यते तर्हितच्च संरक्षणं कथं विधेयमिति प्रश्ने अस्माकं प्राञ्च एवाहुः -

तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबन्धनात् ।

मूर्खहस्ते न दातव्यमेवं वदति पुस्तकम्[६] इति।

ततश्च कश्चन लिपिकारोप्येवं जगाद - भग्नपृष्ठकटिग्रीवा बद्धदृष्टिरधोमुखम् । कष्टेन लिखितं ग्रन्थं यत्नेन परिपालयेत्[७] ॥ इति ।तदारभ्य अद्यावधि यथा प्रकाशनसौलभ्यं वर्तते न तथा तदानीं काले अरर्तिष्ट । तदा लिखितं यद्वर्तते तस्य अनेका हस्तप्रतयः अक्षरशः कर्तव्या आसन् । तदर्थमेव राजभिः विद्वद्भिः लिपिकारा नियुक्ता भवन्ति स्म । तैश्च कष्टेन प्रतिलिपिः श्रद्धया अलिखि । तस्य च संरक्षणमस्माकं परमं कर्तव्यम् ।

तत्रादौ हस्तप्रतयः जलात् तैलात् आतपात् वायोश्च परिरक्षणीयः । यतः हस्तप्रतयः तालपत्रे भूर्जपत्रे वा सामान्येनोपलभ्यन्ते । पत्राणि च जले क्वथयित्वा शुष्कीकृत्य निर्मितानि भवन्ति । पुरातनानीत्यतः सूक्ष्माणि भवन्ति । जलेन यदि निहिताः स्युः तदा अक्षराणां नाशेन सह पत्रमपि मृदु जायते येन छिन्नं खण्डखण्डश्च स्यात् । तैले पतितश्च विविधान् कीटान् आकर्षयति । अधिकमप्यातपात् न सहते पत्रम् । तस्मात् तीव्रात् आतपात् वायोश्च पत्राणि संरक्षणीयानि । पत्रेभ्यः एभ्यः कीटानां बाधा महती भवति । तत्रादौ पापटकः अयश्च अत्युष्णे प्रदेशे अधिकं वर्धते । पुस्तके एव जन्म प्राप्नोति तस्य निरोधाय हस्तप्रतयः वातानुकूलितप्रदेशे संरक्षणीयाः । अन्यथा इमे कीटाः ग्रन्थकीटा इत्यपरनामा हस्तप्रतौ रन्ध्रं कुर्वन् सम्पूर्णं नाशयति । धूलिः वायोः प्रवेशः अवरोद्धव्यः । वयुरेव धूलिं वहति धूलिश्च पुस्तकेषु कीटानां प्रवेशाय सहकारि भवति । म्यास्ट्रलस् इति कश्चन कीटविशेषः धूल्यैव पुस्तकं प्रविशति । पुस्तकस्य कोणेषु अण्डान् स्थापयति । ते च अण्डाः शीघ्रमेव कीटा भवन्ति पुनश्च पञ्चदशेषु दिनेषु अण्डान् स्थापयति ।

---

६. ग्रन्थसम्पादनशास्त्रम् - पृ.सं-२९५ । ७. ग्रन्थसम्पादनशास्त्रम् - पृ.सं-२९४ ।

कश्चन विशिष्टं द्रवं पुस्तकेषु त्यजन्ति । तेन मातृकाः नश्यन्ति । अतः तेभ्यः संरक्षणं मुख्यं कर्म भवति ।

मातृका इति पदस्य पाण्डुलिपिः, पाण्डुपत्रम्, हस्तलेखः, तालकोशः, ताडकोशः इत्यादीनि पर्यायपदान्युपलभ्यन्ते । मातृका नाम अक्षरम् अथवा वर्णः इत्यर्थः । अक्षराणि वर्णाः वा यत्र लिख्यन्ते सापि मातृका इत्यभिधीयते । पाण्डुवर्णकं पत्रं पाण्डुपत्रम् । पाण्डुवर्णयुते पत्रे या लिपिः सा पाण्डुलिपिः । भूर्जपत्रमपि पाण्डुपत्रत्वेन उल्लिख्यते । दक्षिणदेशे उपयुज्यमानं श्रीतालं तालपत्रमपि पाण्डुलिपिपदेनाभिधीयते । पाण्डुलिपिम् अर्थात् पाण्डुपत्रे लिखिता या लिपिः यश्च विषयः वा तदधिकृत्य वा यत्र विचारः भवति तत् शास्त्रं पाण्डुलिपिशास्त्रमित्यभिधीयते ।

मनुष्यलेखमधिकृत्य यत् चिन्तयति शास्त्रं तत् मातृकाशास्त्रं, पाण्डुलिपिशास्त्रं, हस्तलेखशास्त्रं, हस्तलिपिशास्त्रम् इत्यादि पदैरभिधीयते ।मातृका नाम हस्तेन लिखितः कोऽपि ग्रन्थो यत्र साहित्यं वा शास्त्रं वा विषयः । यद्यपि देयकानि स्वीकृतिपत्राणि, गणनालेख्यानि, अधिकृतानि पत्राणि च हस्तेनैव लिखितानि समुपलभ्यन्ते तथापि तेषां मातृकात्वरूपो धर्मो नास्ति । हस्तेन लिखितानां साहित्यानां शास्त्राणां वाऽध्ययनं ग्रन्थसम्पादन- शास्त्रस्य विषयः । प्राचीनान्यधिकृतानि पत्राणि नात्रान्तर्भवन्ति तेषां पत्रागार (Archives) विभागेऽ-न्तर्भूतत्वात् । अधिकृतानां व्यावहारिकाणां वा विषयाणां पंजीकृतिः कार्पासेन शणेन निर्मिते दीर्घे पटे समुपलभ्यते यस्याः पटः, कार्पा- सिकपटः, पटी, पटिका इति चत्वारि नामधेयानि । शणेनापि पटोऽयं वैरल्येन नि- र्मीयते। कन्नडभाषायां 'कडित' अथवा 'कडत' इति संज्ञाऽस्य पटस्य । शिलायन्त्रेण कागदेषु मुद्रितानां तथा दारुफलकेषु मुद्रितानां मातृकात्वमस्तीति केचन आकारसादृश्येन भ्राम्यन्ति। परन्तु तेषामपि नास्ति मातृकात्वम्। शिलासु स्तम्भेषु प्राचीनवास्तुगतकुड्येषु भाजनेषु, अस्थिषु लोहशरावेषु च टङ्कितानि शासनानि शासनशास्त्रस्य विषयः। स्तोत्राणि प्रशस्तयश्च कदाचिदल्पया मात्रया शिलाशासनेषु ताम्रपत्रेषु चोपलभ्ये-रन् । अत्यन्तमवधेयाः साहित्यरचनाः कदाचिदासु सामग्रीषु दृश्येरन् । लेखनमिति शब्दो तालपत्रादिषु लेख्यसामग्रीषु लेखनमित्यर्थेन सार्धं, शिलासु उट्टङ्कनं, भूमौ लिखितमित्यन्यस्मिन्नर्थद्वये प्रयुज्यते।

मातृका नाम वर्णमालिका । मातृकेति शब्दस्य 'हस्तलेखनयुक्ता पत्रिका' इत्यर्थः कस्मिन्नपि कोशग्रन्थे न दृश्यत इत्येतदाश्चर्याय नः। मातृकायस्यां लेख्यसामग्र्यां लिख्यन्ते साऽपि मातृका । पूर्वस्मिन् काले मातृकेति शब्दः मूलप्रतिरथवा आदर्शप्रतिरित्यर्थे प्रयुज्यते स्म । इदमर्थे दक्षिणभारते प्रायिकोऽस्य प्रयोगः। आदर्श इति शब्दोऽप्यमुमेवार्थं वक्ति। 'पुस्तकम्' इति शब्दः प्राचीने काले हस्तप्रतिरित्यर्थे प्रयुज्यते स्म । "दोर्भिर्युक्ता चतुर्भिः' ८ इत्यादिपद्ये तथा "पुस्तकस्था तु या विद्या" ९ इत्यादिश्लोके पुस्तकशब्दस्य प्रतिरित्येवार्थो न पुनर्मूलग्रन्थ इति । मूल-ग्रन्थ इत्यर्थेऽस्य प्रयोगो कल्याणचालुक्यवंश्येन तृतीयसोमेश्वरेण विरचिते राज-मानसोल्लासे 'जगदाचार्यपुस्तकम्' इत्यत्र उक्तः पुस्तकमितिशब्दः योऽत्यन्तं विरल आसीत् प्राचीनकाले। परन्त्वद्यत्वे पुस्तकमिति शब्दस्य मूलग्रन्थ इत्यर्थः सार्वत्रिको दृश्यते। 'कोश' इति 'कोष' इति वा शब्दः सूत्रबद्धपत्रः कोश इत्यर्थे प्रयुज्यते। 'हस्तप्रति'रिति शब्दस्त्वाधुनिकः । प्रायशः 'प्रतिकृति'रिति शब्दस्याहोस्वित् 'प्रतिनिधि'रिति शब्दस्याथवा 'प्रतिमे'ति शब्दस्यैकदेशः प्रतिः। नामैकदेशग्रहणेन नामग्रहणमिति न्यायोऽत्रान्वेति । अथवा वर्णविपर्ययेण पत्री (=पत्रिका )इति शब्दस्यैव प्रतिरित्यन्यदुच्चारणम्। अस्य तु द्वितीयस्यार्थस्य व्याप्तौ भूर्जत्वक्षु कागदेषु च लिखिता हस्तप्रतयो नान्तर्भवन्ति । हस्ताक्षरमित्यस्यैकदेशत्वेन हस्त इति प्रयोगः यथा "स्वहस्तोऽयं महाराजाधिराजस्य श्रीहर्षस्य" इत्यादिषु हर्षवर्धनादिशासनान्तिमवाक्येषु दृष्टचरः । 'पुत्रिका' इति शब्दोऽपि हस्तप्रतिरिति शब्दस्य स्थाने कदाचिद् दृश्यते।औत्तराहैस्तत्प्रान्तभाषासु व्याहरद्भिः पाण्डुलिपिरिति शब्दो यत् प्रयुज्यते तस्य मातृका इत्यर्थो न पुनः पाण्डुलिप्याख्यो लिपिविशेष इति । तालपत्राणां भूर्जत्वचां च पाण्डुवर्णत्वात् तत्र लिख्यमाना लिपिरित्यर्थे तस्य प्रयोगः ।

## सन्दर्भग्रन्थाः

१. ग्रन्थसम्पादनशास्त्रम् - एस्.जगन्नाथः, पूर्णप्रज्ञसंशोधनमन्दिरम्, पूर्णप्रज्ञ विद्यापीठम्, बेङ्गलूरु - २८ - २०१४

---

८. स्तोत्रमञ्जरी - पृ.सं - २५ ।

९. सुभाषितमञ्जरी - पृ.सं - ४४१ ।

२. तैत्तिरीयकृष्णयजुर्वेदः - भाग-२ - रामकृष्णमठः,बसवनगुडि, बेङ्गलूरु - १९९३
३. भारतीयग्रन्थसम्पादनशास्त्रप्रवेशिनी - राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, २००२
४. Introduction to Manuscriptology – R.S.Shivaganeshamurthy, Sharada Publishing House, Delhi – 35 – 1996
५. हस्तप्रति अध्ययनशास्त्र (कन्नड)- डा.ना.गीताचार्यः, बि.एम्.श्रीस्मारकप्रतिष्ठान, एन्.आर्.कालोनी, बेङ्गलूरु - १९ - २००९

**Dr. Ramakrishna Bhat K**
Assistant Professor
Department of Manuscriptology
Karnataka Samskrit University
PMK Road, Chamarajpet-560018
Bangalore, Karnataka
Mobile : 9844741855
E-mail : kootelubhat@gmail.com

•••••••••

Impact Factor : 6.125

ISSN : 2395 - 5104

# शब्दार्णव Shabdarnav

*International Peer Reviewed Referred Journal of Multidisciplinary Research*

Year 8 | Vol. 15, Part-I | January-June, 2022

Scientific Research
Educational Research
Technological Research
Literary Research
Behavioral Research

Editor in Chief
DR. RAMKESHWAR TIWARI

Executive Editors
DR. KUMAR MRITUNJAY RAKESH
MR. RAGHWENDRA PANDEY

Published by
SAMNVAY FOUNDATION
Mujaffarpur, Bihar

**Shabdarnav**
ISSN 2395-5104

## PATRONS

- Prof. Rajaram Shukla (INDIA)
- Dr. Shankar Mishra (MAURITIUS)
- Mr. Narvat Vious (GERMANY)
- Dr. Satish Prakash (AMERICA)

## EDITOR IN CHIEF

Dr. Ramkeshwar Tiwari

## ASSOCIATE EDITORS

- Prof. Umakant Chaturvedi
- Prof. Ranjan Kumar Tripathi
- Prof. Ramsewak Dubey
- Dr. Chandrakant Dutt Shukl
- Prof. Shyamanand Mishra
- Prof. Ramnarayan Dwivedi
- Dr. Ramakant Pandey
- Dr. Rajiv Kumar Singh

## WORKING GROUP

- Dr. Shashikant Tiwari
- Dr. Neeraj Kumar Bhargava
- Dr. Durgesh Pathak
- Mr. Satish Kumar Pandey
- Dr. Sandeep Kumar Chaurasiya
- Dr. Prabhakar Pandey
- Dr. Sudhanshu Chaubey
- Dr. Krishna Kumar Mishra

### समीक्षक मण्डल

1. प्रो. मार्कण्डेय नाथ तिवारी– सांख्ययोग विभाग, श्री ला.ब. शा. रा. सं. विद्यापीठ, नई दिल्ली
2. प्रो. रामपूजन पाण्डेय– न्याय वैशेषिक विभाग, स. स. वि. वि. वाराणसी
3. डॉ. मणिशंकर द्विवेदी– वरिष्ठ शोध सहायक, श्री शंकर शिक्षायतन दिल्ली
4. डॉ. मुकेश कुमार शुक्ल– सहायक आचार्य हिन्दी एवं पत्रकारिता, वसन्ता कालेज, राजघाट, वाराणसी
5. डॉ. अवधेश दीक्षित– हिन्दी विषय विशेषज्ञ, वाराणसी
6. डॉ. अशोक कुमार– असि0प्रो0, भूगोल, मगधविश्वविद्यालय, बोधगया, बिहार
7. डॉ. प्रमोद शुक्ल– एसो0 प्रोफेसर, जवाहर लाल नेहरू विश्वविद्यालय
8. डॉ. यदुवीर स्वरूप शास्त्री– सहायक आचार्य, स्नातकोत्तर व्याकरण विभाग, का0सि0द0सं0वि0वि0, दरभंगा
9. डॉ. अजीत राय– सहायक आचार्य, इतिहास विभाग, सरदार वल्लभभाई पटेल कॉलेज, भभुआ
10. डॉ. अम्बुज त्रिवेदी– सहायक आचार्य, ज्योतिष विभाग, ब्र0सं0म0, खरखुरा, गया बिहार
11. डॉ. आशुतोष द्विवेदी, सहायक आचार्य, संस्कृत विभाग, जय प्रकाश विश्वविद्यालय, छपरा
12. डॉ. ध्रुव मिश्रा– सहायक अचार्य, वेद विभाग, म0अ0 रमेश्वरलता संस्कृत महाविद्यालय, दरभंगा
13. श्री लवजी, अध्येता, अर्थशास्त्र विभाग, का0हि0वि0वि0, वाराणसी

**Date of Publication : 24/01/2022**

Contact for : **Mr. Ankit Dubey**
Mobile : 9473531601
Website : www.shabdarnav.com - e-mail ID : shabdarnav@gmail.com

**PRINTED BY : Raj Graphics**
BHU Road (Near SBI ATM), Lanka, Varanasi - Mob. :

---

**विशेष** : पत्रिका के किसी भी प्रकार की समस्या के समाधान का अधिकार सम्पादक मण्डल के पास स्थायी रूप से सुरक्षित है तथा लेखकों के शोध–पत्र उनके अपने विचार हैं, पत्रिका परिवार उनके विचारों से सहमत हो यह आवश्यक नहीं है।

- विविधाधुनिकसाहित्ये केशवाचार्यस्य योगदानम्
  *Shibnath Sarkar* 218–220
- वैयाकरणमते समासशक्तिविचारः
  *सुमनपालधी* 221–223
- आमेर के राजा मानसिंह एवं मिर्जाराजा जयसिंह (ऐतिहासिक एवं सांस्कृतिक परिप्रेक्ष्य)
  *तोसिफ अली* 224–227
- नैषधीयचरितरचयितुः श्रीहर्षस्य दार्शनिकदृष्टिः
  **Naiṣadhīyacaritaracayituḥ Śrīharṣasya Dārśanikadṛṣṭiḥ**
  *विभव कुमार झा* 228–230
- उपन्यास साहित्य में समीक्षा के प्रतिमान
  *प्रोफेसर वाई० वेंकटलक्ष्मी* 231–232
- श्रीमद्भगवद्गीतायां विशिष्टाद्वैतदर्शनानुसारं जीवात्मपरमात्मनोः गुरुशिष्यस्वरूपम्
  *यतिराज सापकोटा* 233–236
- अद्वैतवेदान्तशास्त्रे साधनचतुष्टयदृष्ट्या शान्तिः
  *असित कुमार मण्डलः* 237–240
- 'एक पुरुष और' की प्रासंगिकता
  *प्रो० बी० सुभा* 241–243
- वेदों में कृषि व्यवस्था के बीज
  *डॉ० हरेती लाल मीना* 244–247
- भट्टश्रीनागेशस्य देशकालकृतित्वविमर्शः
  *डॉ० महेशकुमारद्विवेदी* 248–252
- कठोपनिषद् में मनस्तत्त्व विमर्श
  *डॉ० मेघराज मीणा* 253–256
- शब्दशास्त्रे भावपदार्थविवेचनम्
  *Dr. P.R. Archana Karanth* 257–260
- श्रीमद्भगवद्गीता में धर्म
  *डॉ० राधा रानी श्रीवास्तव* 261–263
- वाचकत्वशक्तिः
  *Dr. Ramakrishna Bhat K* 264–265
- भारतीय–शिक्षाग्रन्थानां संक्षिप्तपरिचयः
  *डॉ० शर्मिला* 266–268
- खहर–राशौ अविकारत्वविचारः
  *डॉ० यज्ञदत्तः* 269–271
- शब्दार्थविज्ञानम् – समीक्षात्मकमध्ययनम्
  *मल्लिकागिरिः* 272–274
- गणपाठस्य पाणिनीयत्वनिर्धारणे साधकप्रमाणसमीक्षणम्
  *रोहित कुमार* 275–278
- पादुकासहस्रकाव्येऽलंकारच्छटा
  *श्वेता सिंहः* 279–281
- कादम्बरी में प्रकृति–चित्रण
  *मोनिका* 282–284

Shabdarnav :*An International Peer Reviewed Refereed Research Journal*| ISSN - 2395-5104
वर्ष–8, अंक–15, भाग–1, जनवरी–जून, 2022| Impact Factor : 6.125

# वाचकत्वशक्तिः

**Dr. Ramakrishna Bhat K***

अर्थस्य अवबोधनाय शब्दस्य प्रयोगः क्रियते। तौ च शब्दार्थौ द्विविधौ। अपोद्धारपदार्थः, स्थितलक्षणः इति अर्थः द्विविधः। अन्वाख्येयः, प्रतिपादकः इति शब्दः अपि द्विविधः[1]। अर्थबोधकत्वसामर्थ्यं कीदृशेषु शब्देषु अस्ति इति विचारः। साधुशब्दाः, आसधुशब्दाः इति शब्दाः द्विविधाः। तत्र शिष्टेभ्यः[2] आगताः, आगमात् सिद्धाः साधुशब्दाः, विपरीतास्तु असाधवः। गौरिति साधुशब्दः, गावी-गोणी-गोता-गोपोतलिकेत्यादयः असाधुशब्दाः। व्याकरणसंस्कारहीनः साधुशब्दमजानन् सास्नादिमदर्थे गावी-गोणी इत्याद्यपभ्रंशं प्रयुङ्क्ते। तत्प्रयुक्तं शब्दं शिष्टाः अपभ्रंशत्वेनेच्छन्ति। प्रयोक्ता तु संस्कारहीनत्वात् शब्दापशब्दज्ञानशून्य एव। अपभ्रंशस्थले अस्त्याचार्याणां मतभेदः। तत्र संग्रहकारः "शब्दप्रकृतिरपभ्रंशः" इत्यनेन विकृतिरूपस्यापभ्रंशस्य प्रकृतिः साधुशब्द इति मन्यते। एवं महाभाष्येऽपि "न हि अपभ्रंशः स्वतन्त्रः कश्चित् विद्यते, सर्वस्य अपभ्रंशस्य साधुशब्द एव प्रकृतिः" इत्युक्तम्। केचित्तु संस्कृतशब्दस्य प्रकृतिरपभ्रंश इत्याहुः। अन्ये तु "अपभ्रंशः साधुशब्दवत् स्वतन्त्रः अनादिः" इत्यप्यूचुः। तत्र प्रवृत्तिनिमित्तमेव शब्दानां साधुत्वोपकारकम्। अतः ये कुत्रचिदर्थे अपभ्रंशाः शिष्टैः अस्साधुत्वेन अभिमताः त एव प्रवृत्तिनिमित्तभेदात् अन्यार्थे साधवः सन्ति। यथा अश्वत्वादि जातिविशिष्टेअर्थे असाधुः अस्वशब्दः (नास्ति स्वं धनं यस्य) धनहीनपुरुषविशेषे साधुः। एवं गोत्वजातिविशिष्टे अर्थे असाधुः गोणीशब्दः गोदोहनपात्रत्वरूपावपनत्वविशिष्टे अर्थे साधुः। इत्थं च प्रवृत्तिनिमित्तभेदप्रयुक्त-अर्थभेदोऽपि शब्दस्य साधुत्वासाधुत्वव्यवस्थायां निमित्तः न तु केवलं शब्दस्वरूप एव। तत्र अर्थबोधकत्वं कस्य शब्दस्य इति चेत् – उभयत्र साध्वसाधुशब्दे अर्थबोधकत्वशक्तिः वर्तत इति वैयाकरणसमयः। तदुक्तं हरिणा – "वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः", "अर्थप्रत्यायनाभेदे विपरीतास्त्वसाधवः"[3] इति। अर्थप्रत्यायनाभेदः इत्यस्य अर्थबोधकत्वे भेदाभावः इत्यर्थः। "समानायामर्थावगतौ शब्देन अपशब्देन च धर्मनियमः क्रियते"[4] इति कथयद्भिः भाष्यकारैरपि अर्थावगतिः उभयत्र समाना इत्यङ्गीकृता। अयञ्च विचारः विशदरूपेण चर्चितः परमलघुमञ्जूषायाम्[5], वाक्यपदीयस्य ब्रह्मकाण्डे च।

तत्र वाचकः शब्दः, वाच्यः अर्थः। एतादृशवाच्य-वाचकभावाख्या शक्तिः साधुशब्देषु यथा अस्ति तद्वत् असाधुशब्देष्वप्यस्ति। अत्रार्थे शक्तिग्राहकशिरोमणिः व्यवहार एव गमकः। स च व्यवहारः आवाप-उद्वापरूपः उभयत्रापि समानः। यदि व्यवहारदर्शनमेव शक्तिग्राहकं तर्हि जन्मसमये व्यवहारबोधकशब्दाभावात् शक्तिग्रहः न स्यात्, कथं वा नवजातशिशोः स्तनपाने प्रवृत्तिः इति चेत् – तादृशस्थले शिशोः स्तनपाने प्रवृत्ति-निवृत्तिदर्शनेन व्यवहारबोधकशब्दाभावेऽपि पूर्वजन्मनि अनुभूतशक्तिस्मरणमेव तत्र कारणम् इति स्वीक्रियते।

तार्किकास्तावत् अपभ्रंशस्थले व्युत्पन्नानां साधुशब्दस्मरणात्, अव्युत्पन्नानां शक्तिभ्रमात् बोधः। ततश्च अपभ्रंशस्थले शक्तिर्नास्तीत्याहुः। आह च हरिः –

**ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः। तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः॥**
**न शिष्टैरनुगम्यन्ते पर्याया इव साधवः। ते यतः स्मृतिशास्त्रेण तस्मात् साक्षादवाचकाः॥[6]**

साधुशब्दे एव शक्तिः, न अपभ्रंशेषु। अपभ्रंशस्थले साधुशब्दस्मरणादेव शाब्दबोधः। यथा अम्बा अम्बेति वक्तुं वृद्धैः अनुशिष्यमाणः द्विहायनो बालः नियतानुपूर्वीक्रमशून्यमुच्चारयति। तदानीं तत्प्रकृतिकसाधुशब्दविदां तेन अपभ्रंशेन साधुशब्दे अनुमिते सति अर्थाववोधः भवति। अयमियं शब्दं कथयतीति ते निश्चिन्वन्ति। तद्वत् गौरित्यादि साधुशब्दे प्रयोक्तव्ये यः अशक्त्या प्रमादाद्वा गाव्यादिरूपापभ्रंशशब्दान् प्रयुज्यते तेन अपभ्रंशेन अनुमितः यः साधुशब्दः तेनैव विवक्षितार्थः सास्नादिरूपार्थः वोध्यते, न तु साक्षादपशब्देन। यस्मादेव ते गाव्यादयः अपभ्रंशाः शिष्टैः, लक्षणादिभिः नैव अन्वाख्याताः तस्मादेव हेतोः ते साक्षादर्थस्य न वाचकाः इति तन्मतम्।

परं मतमिदमयुक्तमित्याहुः वैयाकरणाः। साधुशब्दस्मरणेन असाधुशब्दस्थले अर्थबोधः इति कथनमयुक्तम्। व्युत्पन्नानामपि साधुशब्दस्मरणाभावेऽपि अर्थबोधः भवति। किञ्च यदि साधुशब्दस्मरणेनैव असाधुशब्दादर्थबोधः तर्हि तद्वाचक-साधुशब्दज्ञानहीनवतः पुरुषस्य कथं वा बोधः भवेत्। एवं अपभ्रंशस्थले

*HOD, Department of Manuscriptology, Karnataka Samskrit University, PMK Road, Chamarajpet, Bangalore 18

अव्युत्पन्नानां शक्तिभ्रमात् बोधः इति कथनमप्यसमीचीनम्। संशयः यत्र भवति तत्रैव भ्रमः, तद्वति तदभावप्रकारकम् ज्ञानम् हि भ्रमत्वम्। परं यत्र संदेहः नास्ति तादृशस्थले भ्रम एव न सम्भवति। तथाच अपभ्रंशशब्देष्वपि अर्थबोधकत्वशक्तिसद्भावादेव अल्पाधीतानां अनधीतानां स्त्रीणाम्, शूद्राणाम्, बालानां च माधुशब्दे उच्चारिते, यदि अर्थसंशयः जायते तर्हि तस्य साधुशब्दस्य यः अपभ्रंशशब्दः तेन अर्थनिर्णयः संभवति। तथाच वाचकत्वं उभयत्रापि समानम्, परं साधुशब्दप्रयोगे पुण्यम्, अपशब्दप्रयोगे पापमिति शिष्टाचारः। श्रुतिरप्याह – "एकः शब्दः सम्यक् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग्भवति" इति।

साधुशब्देष्विव अपशब्देष्वपि वाचकत्वशक्तिसद्भावादेव मीमांसादर्शनोक्तं आर्यम्लेच्छाधिकरणमपि सुसङ्गतं भवति। तथा हि – वैदिककर्मणि येषामधिकारः ते आर्या, आर्येतराः म्लेच्छाः। 'यव' इति शब्दस्य दीर्घशूकत्वमर्थः इति आर्याः ऊचिरे। म्लेच्छास्तु यवशब्दस्य प्रियङ्गुरित्यर्थम् आहुः। तत्र वेदे यवशब्दः कस्मिन्नर्थे प्रयुक्तः, कश्चार्थः स्वीकरणीयः इति जिज्ञासायां मीमांसकैरुक्तम् – "आर्यप्रसिद्धि-म्लेच्छप्रसिद्ध्योः मध्ये आर्यप्रसिद्धेः बलवत्वम्" इति न्यायात्, आर्याणां च वैदिककर्मण्यधिकारात् दीर्घशूकार्थः तैरभ्युपगतः।

एतेन साधुशब्देष्विव अपशब्देष्वपि शक्तिः समर्थिता भवति। यदि अपशब्दे शक्तिर्नैव स्वीकियते तर्हि म्लेच्छबोधस्य प्रियङ्ग्वर्थस्य शक्तिभ्रममूलकत्वेन पदार्थ-अनवबोधकत्वं स्यात्। यथा – शुक्तौ रजतस्य भ्रान्तिज्ञानेऽपि तद्रजतं न पात्राय कल्पते तद्वदिहापि अपशब्दे भ्रान्त्या अर्थज्ञानेऽपि तच्च शब्दः न अर्थावबोधकः भवति। स्थिते चैवं "आर्यप्रसिद्धिम्लेच्छप्रसिद्ध्योर्मध्ये कस्य बलवत्वम्" इति उभयोः प्रसिद्धेर्बलवत्वविचारः असङ्गत एव स्यात्। अतः अप्रभ्रंशेष्वपि शक्तिरङ्गीकर्तव्या। तदुक्तं हरिणा –

**पारंपर्यादपभ्रंशा विगुणेऽष्वभिधातृषु। प्रसिद्धिमागता येषु तेषां साधुरवाचकः॥[7]**

शब्दानां अर्थबोधे तात्पर्यम्। तत्र संस्कारसंपन्नाः शिष्टाः साधुभिरेव व्यवहरन्ति। परं साध्वसाधुविचारशून्याः स्त्री-शूद्रादयः अपभ्रंशैरेव व्यवहरन्ति। तद्व्यवहारे अपभ्रंशा एव अर्थबोधकाः, साधवश्च अवाचकाः। एवं च अनादिवृद्धव्यवहारात् तत्तद्भाषारूपेण प्रसिद्धाः ये अपभ्रंशाः तेषां साधुशब्दस्मृतेरावश्यकता नास्ति। वृद्धव्यवहारात् तेषु शक्तिस्वीकारेण स्वयमेव ते अर्थावबोधकां भवन्ति। अनुभव एवात्र प्रमाणम् ॥

## सन्दर्भग्रन्थसूची :

1. पाणिनीयः अष्टाध्यायी सूत्रपाठः, पूर्वपीठिका-सूत्रविवरणात्मक 'प्रह्लाद' टिप्पणीसहितः, चौखम्बा कृष्णदास अकाडमी।
2. आचार्यभर्तृहरिप्रणीतम् वाक्यपदीयम्, व्याख्याद्वयोपेतम्, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः।
3. श्रीमन्महर्षिपतञ्जलिविनिर्मितं व्याकरणमहाभाष्यम्, भाष्यप्रदीपोद्योतसमुलसितम्, चौखम्बा संस्कृत प्रतिष्ठानम् 2007
4. महामहोपाध्यायनागेशभट्टविरचितः परमलघुमञ्जूषा, किरणावली व्याख्योपेता, चौखम्बा संस्कृत प्रतिष्ठानम्।
5. श्रीमत्कौण्डभट्टविरचितः वैयाकरणभूषणसारः, प्रभा-दर्पणव्याख्याद्वयोपेतः, चौखम्बा संस्कृत प्रतिष्ठानम्।
6. नागेशभावप्रकाशसहिता लघुमञ्जूषा, व्याख्या – पेरी सूर्यनारायणशास्त्री।

## सन्दर्भ :

1. अपोद्धारपदार्था ये ये चार्थाः स्थितलक्षणाः।
   अन्वाख्येयाश्च ये शब्दाः ये चापि प्रतिपादकाः ॥ -ब्रह्मकाण्डम्
2. अलोलुपाः कुम्भीधान्याःकिञ्चिदन्तरेण कस्याश्चित् विद्यायां पारङ्गताः ते खलु शिष्टाः - महाभाष्यम्
3. वा. प. – ब्रह्मकाण्डम् २७
4. पश्पशाह्निकम्
5. शक्तिप्रकरणम्
6. वा. प. - ब्र. का १४९/१५०
7. वा. प. – ब्रह्मकाण्डम् - १५३

प्रियो भवति अत्मनस्तु कामाय पतिः प्रियो भवति......आत्मनस्तु कामाय सर्वं प्रियं भवति'[12] इत्याद्युक्त्वा 'आत्मा वा अरे दृष्टव्यो मन्तव्यो निदिध्यासितव्यः मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम्'[13] इति उक्त्वा, मानवः सुखं विषयदेशेषु बहिः आनन्दमन्विषति यथा मन्दिरे, भूमौ, स्वर्गे च सर्वत्रान्विषति । यस्माच्च निर्गत्य पुनस्तत्रैवायाति । प्रदक्षिणं त्वन्वेषणे पूर्णं भवति किन्तु आनन्दस्वरूपः भगवान् नोपलभ्यते । यतो हि सः आनन्दः हृदयगुहायामेव स्थितः वर्तते । तस्य प्राप्तिस्थानं सैव । 'अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये संनिविष्टः'[14] । तत्र स उपलभ्यते तर्हि अन्वेषणीयं जीवने किमपि नावशिष्यते । इन्द्रियाणां तु स्वविषयेषु प्रसरणं स्वभाव एव, 'पराञ्चि खानि व्यतृणत् स्वयंभूः तस्मात् पराङ्पश्यति नान्तरात्मन्'[15] अर्थात् सर्वेऽपि सुखमन्विष्यन्ति, अन्विष्यन्तः सर्वत्र जीवनमेव यापयन्ति । तत्सहजमिति वदति श्रुतिः । अतः बलाद्यदि निगृह्य मनसा अन्तर्मुखीकरणेन तेषां तत्र स्वरूपभूतानन्दमुपलभते । जीवने आप्तव्यमन्वेषणीयं च किमपि नावशिष्यते ।

'अहमद्वैतमेव प्रतिपादयामीति जनाः पृच्छन्ति । द्वैतं वाद्वैतं वा तदन्यत्तत्त्वं वा बोधने मे तात्पर्यं नास्ति । किन्तु आत्मविषयक-ज्ञानमपेक्ष्यते इति तु सर्वथा प्रतिपादयामि । आत्मनः अनन्तशक्तिं परिशुद्धतां परिपूर्णतां चाहं सर्वदा बोधयामि । यदि शिशुः स्यान्मदीयं तर्ह्यहं 'त्वमात्मा' इत्येवावगाहयेयम्, यथा मदालसा स्ववत्सं 'त्वं परिशुद्धोऽसि कलङ्करहितः पापदूरः शक्तिशालिन् परमश्रेष्ठः' इत्येव स्वापयति, लालयति स्म । एवमात्मानं यदि श्रेष्ठत्वेन मन्यते तर्हि श्रेष्ठ एव भविष्यति' आत्मैव ज्ञातव्यः जगति मानवेन । 'जगतः औन्नत्यमत्रैवास्ति'[16] । स्वस्थसुसंस्कृत-समाजनिर्माणाय स्वस्थव्यक्तेः निर्माणमपेक्षितम् । व्यक्तिस्तु मानसिक-दैहिक-बौद्धिक-आध्यात्मिकरूपेण च स्वस्थो भवेत् । तथा स्वास्थ्यसम्पादनाय आत्मनि विश्वासः तज्ज्ञानं चापेक्षितम् । अतः समष्टिहितं तु व्यष्टिगतात्मज्ञाने एव वर्तते[17] ।

'स्त्रीपुरुषादयः दैववद्द्रष्टव्याः । सेवा च कर्तव्या न तु साहाय्यम् । अर्भकाः अपि पूजनीयाः । अर्भकसेवावकाशः जीवने प्राप्यते चेत् आत्मानं धन्यं मनुयात् । दरिद्रेषु परमात्मा द्रष्टव्यः । मुक्तये मुख्यतया दरिद्रसेवैव करणीया । दीन-दरिद्र-रोगि-उन्मत्त-कुष्ठ-पापिरूपेण देवः प्रकटो भवति । अतः भगवतः विविधरूपाः एवं पूजनीयाः, एतादृशानां सेवया मुक्तये मार्गं परिकल्पयति भगवान् । तदेव पुण्यमित्यहं भावयामि' । 'ज्ञानस्य प्रचारः कर्तव्यः । अधिकाधिकं कर्तव्यः । सर्वे च

# वेदाङ्गानां प्राशस्त्यम्

डा ॥ रामकृष्णभट् के

धर्मजिज्ञासमानानां प्रमाणं परमं श्रुतिः इति मनुस्मृतिवचनानुसारं समस्तमेव भारतीयं ज्ञानं वेदमाश्रित्य प्रवर्तते । भाषायां भावे च वेदाः अतीव दुर्बोधाः । तादृशवेदानामर्थं यथायथं निरूपयन्ति वेदाङ्गानि । वेदेषु भारतीया संस्कृतिः बीजरूपेण विद्यते, यस्याः पल्लवनाय वेदाङ्गानि उपयुज्यन्ते । अङ्ग्यन्ते ज्ञायन्ते अमीभिरिति अङ्गानि इति उपकारार्थपराङ्गशब्दस्य व्युत्पत्तिरप्येनमर्थं पुष्णाति ।

वेदाङ्गानां नामभिः परिगणनं सर्वप्रथमं मुण्डकोपनिषदि उपलभ्यते, यत्र एतानि अपरविद्यान्तर्गतानि सन्ति । तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति इति तत्र मन्त्रः । एतानि वेदाङ्गानि वेदाख्यपुरुषस्य अवयवत्वेन परिगणितानि पाणिनीयशिक्षायां यथा –

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥ इति[1] ।

वाल्मीकिरपि सुन्दरकाण्डे षडङ्गानां प्राशस्त्यं न्यरूपयत् यथा?

षडङ्गवेदविदुषां क्रतुप्रवरयाजिनाम् ।
शुश्राव ब्रह्मघोषान् स विरात्रे ब्रह्मरक्षसाम् ॥ इति[2] ।

षण्णां वेदाङ्गानां संक्षेपेण प्राशस्त्यमिह निरूप्यते?

**शिक्षा –**

वैदिकवाङ्मये सर्वतः प्रथमं वेदमन्त्राणां यथायथमुच्चारणमावश्यकं वर्तते । एतादृशोच्चारणक्रमे उपकारकं भवति शिक्षाख्यं वेदाङ्गम् । स्वरवर्णादीनामुच्चारणनियमबोधयित्री एव शिक्षा । अथ शीक्षां व्याख्यास्यामः, वर्णः

---

१. पा. शि.४१/४२
२. वा. रा.५/१८/२

Impact Factor : 6.240

ISSN 2349-364X

# वेदाञ्जलि Vedanjali

अन्तर्राष्ट्रीय विद्वत्समीक्षित षाण्मासिकी शोधपत्रिका

*(International Peer Reviewed Refereed Journal of Multidisciplinary Research)*

वर्ष-९ अंक-१७, भाग-१ जनवरी-जून, २०२२

प्रधान सम्पादक

डॉ० रामकेश्वर तिवारी

सह सम्पादक

श्री प्रसून मिश्र

प्रकाशन : वैदिक एजूकेशनल रिसर्च सोसाइटी, वाराणसी

जगत्शिष्य पं. शिवपूजन चतुर्वेदी
श्री नरवट वॉयस (जर्मनी)

**प्रधानसम्पादक**
डॉ0 रामकेश्वर तिवारी

**सह सम्पादक**
श्री प्रसून मिश्र

## सम्पादक मण्डल

डॉ0 उमाकान्त चतुर्वेदी
डॉ चन्द्रकान्त दत्त शुक्ल
डॉ0 कुमार मृत्युंजय राकेश
डॉ0 देवि प्रभा

## शोध पत्र–समीक्षक मण्डल

डॉ0 उमापति मिश्र, अतिथि अध्यापक, वेद विभाग, का0हि0वि0वि0, वाराणसी

- डॉ0 पवन कुमार यादव, सहायकाचार्य, दर्शन, सी0एम0पी0 डिग्री कॉलेज, प्रयागराज
- डॉ0 चिरंजीवी अधिकारी, आचार्य, व्याकरण, श्रीमाता वैष्णो देवी गुरुकुल चरण पादुका कटरा जम्मू कश्मीर
- डॉ0 निर्भय कुमार पाण्डेय, सहायकाचार्य (संविदा), ज्योतिष, रानी पद्मावती तारा योगतन्त्र आदर्श संस्कृत महाविद्यालय, वाराणसी
- डॉ0 नीरज तिवारी, सहायकाचार्य, साहित्य, राष्ट्रिय संस्कृत संस्थान, लखनऊ परिसर, लखनऊ
- डॉ0 नन्दकिशोर तिवारी, सहायकाचार्य, व्याकरण, राष्ट्रिय संस्कृत संस्थान, भोपाल परिसर, लखनऊ
- डॉ0 रविशंकर पाण्डेय, सहायकाचार्य, संस्कृतविद्या विभाग, स0स0वि0वि0, वाराणसी
- डॉ0 सुनील कुमार तिवारी, सहायकाचार्य, हिन्दी, शहीद भगत सिंह कॉलेज, दिल्ली विश्वविद्यालय, दिल्ली
- डॉ0 रंजन कुमार त्रिपाठी, सह–आचार्य, साहित्य, संस्कृत विभाग, दिल्ली विश्वविद्यालय, दिल्ली
- डॉ0 अशोक राम, असि0प्रोफेसर, भूगोल विभाग, एस0एन0 सिन्हा कॉलेज, वार्सलिगंज, बिहार
- डॉ0 शशिकान्त तिवारी, दर्शन विशेषज्ञ, हरियाणा

## परामर्शदात्री समिति

| | |
|---|---|
| प्रो0 बाल शास्त्री | प्रो0 रमेशचन्द्र पण्डा |
| प्रो0 हरेराम त्रिपाठी | प्रो0 हरीश्वर दीक्षित |
| प्रो0 रामजीवन मिश्र | प्रो0 श्रीपति त्रिपाठी |
| प्रो0 संतोष शुक्ल | डॉ0 कामेश्वर उपाध्याय |
| डॉ0 राजीव रंजन तिवारी | श्री जय प्रकाश चतुर्वेदी |

**प्रकाशन तिथि : 24/01/2022**

## सम्पर्क सूत्र

**श्री अंकित दुबे**
दूरभाष : 9473531601
Website : vedanjalijournal.com / e-mail : vedanjali2014@gmail.com

**विशेष :** पत्रिका के किसी भी प्रकार की समस्या के समाधान का अधिकार संरक्षकों के पास स्थायी रूप से सुरक्षित है तथा लेखकों के शोध–पत्र उनके अपने विचार हैं, पत्रिका परिवार उनके विचारों से सहमत हो यह आवश्यक नहीं है।

- प्रतिमानाटके भ्रातृभक्ति : एकं समीक्षात्मकमध्ययनम — 188–192
  *Dr. Menakarani Sahoo*
- भावक्रिययोर्द्वैविध्यनिरूपणम् — 193–195
  *Dr. P.R. Archana Karanth*
- प्रयोजनमूलक भाषा की महत्ता — 196–198
  *पवन कुमार त्रिवेदी*
- औचित्यसम्प्रदायविमर्शः — 199–200
  *डॉ० राजेशकुमारमिश्रः*
- 'अस्मिता' का सवाल और प्रेमचंद की कहानियाँ — 201–205
  *डॉ० रमेश यादव*
- कर्मार्थविचारः — 206–209
  *Dr. Ramkrishna Bhat K.*
- वेदों में दार्शनिक सूत्र — 210–215
  *डॉ० सत्यमुदिता स्नेही*
- लक्षणविचारः — 216–219
  *डॉ० वि०वि०एस०आर० लक्ष्मी*
- वेदे आदर्शदाम्पत्यजीवनम् — 220–222
  *ज्ञानेश उपाध्यायः*
- गौडीयवैष्णववेदान्ते विशुद्धसत्त्वस्य स्वरूपम् : आपातभिन्नता समन्वयश्च — 223–226
  *मधुमाधवी शासमल*
- ज्योतिषदृष्ट्या विविधराजयोगविचाराः — 227–229
  *मुकेश कुमार*
- 'हास्य–व्यंग्य' सम्राट – प्रो० हरिमोहन झा — 230–232
  *पवन कुमार महतो*
- लघुजातकम् में वर्णित आयु–साधन विधि — 233–236
  *पवन कुमार शर्मा*
- उपनिषदों में मानवीयमूल्यों की अवधारणा — 237–239
  *प्रकाश चन्द*
- काव्यशास्त्रे नैतिकशिक्षायाः उपादानानि — 240–243
  *प्रशान्तमनोहरत्रिपाठी*
- भारतीयव्याकरणशास्त्रपरम्परायां महाभाष्यप्रदीपप्रकाशस्य अवदानम् — 244–248
  *Rajkumar Mondal*
- वेणीसंहारे अर्थोपक्षेपकाः — 249–253
  *सजिता. के.के.*
- महाकवि केशवराम शर्मा विरचित 'भारतीयदर्शन एक अनुशीलन' ग्रन्थों का संक्षिप्त परिचय — 254–259
  *Shibnath Sarkar*

वेदाञ्जलि, An International Peer Reviewed Refereed Research Journal
वर्ष-९, अंक-१७, भाग-१, जनवरी-जून, २०२२ | ISSN : 2349-364X | Impact Factor : 6.240

# कर्मार्थविचारः

Dr. Ramkrishna Bhat K.*

"कर्ता कर्म च करणं च संप्रदानं तथैव च।
अपादानमधिकरणमित्याहुः कारकाणि षट्॥

इत्योक्तदिशा कर्तादि-षट्कान्यतमत्वं कारकत्वमित्यर्थः सिध्यति। तेषु द्वैतीयीकं कारकं भवति कर्मकारकम्। "कर्तुरिप्सिततमं कर्म"[1]इत्यनेन शास्त्रेण कर्मकारकस्य लक्षणं निजगाद भगवान् पाणिनिः।कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यादिति तदर्थः। देवदत्तस्तण्डुलं पचतीत्यत्र तण्डुलस्य कर्त्रा क्रियया आप्तुमिष्टतमत्वात् कर्मत्वसिद्धिः। सति च कर्मत्वे "कर्मणि द्वितीया" इत्यनेन द्वितीयाविभक्तिस्तण्डुलमिति। प्रबन्धेऽस्मिन् चत्वारः अंशाः उपपादिताः

१) द्वितीयायाः आश्रयः अर्थः।

२) कर्मत्वस्य लक्षणम्।

३) कर्मत्वलक्षणे अव्याप्त्यतिव्याप्तिदोषसम्भावना, तत्परिहारोपायश्च।

४) नैयायिकरीत्या दोषपरिमार्जनरीतिः, तन्निराकरणश्च।

**द्वितीयायाः आश्रयः अर्थः -**

कर्मणि द्वितीयायाः आश्रयः अर्थः। तथाह्युक्तमाकरे –

**आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा।**
**यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः ॥[2]**

ननु कर्मणि द्वितीया इत्याद्यनुशासनबलात् द्वितीयादीनां कर्मार्थकत्वं लभ्यते, न तु आश्रयार्थत्वम्, तत्र अनुशासनाभावादिति चेदत्रोच्यते – "कर्मणि द्वितीया"[3] इति सूत्रेण कर्मणि वर्तमानात् प्रातिपदिकाद्द्वितीया विधीयते। तच्च कर्म कर्तुरीप्सिततमम्, अर्थात् क्रियाजन्यफलाश्रयः। तथाच "कर्तुरिप्सिततमं कर्म" इति सूत्रे कर्तुः इत्यत्र "क्तस्य च वर्तमाने"[4] इति कर्तरि षष्ठी। स चा आश्रयमात्रबोधिका। ईप्सिततममित्यत्र आप्नोतेः सन्नन्ततात् कर्मणि "मतिबुद्धिपूजार्थेभ्यश्च"[5] इति वर्तमाने क्तः। कर्ता केनाप्तुमिच्छतिति करणाकाङ्क्षायां, कर्तृपदार्थविशेषणे व्यापारे अन्वयः।

ननु द्वितीयायाः आश्रय एवार्थो न तु फलव्यापारौ इति कथं निश्चीयते इति चेदाह – क्रियायाः, फलस्य च धातुनैव लाभात् "अनन्यलभ्यः शब्दार्थः" इति न्यायेन अन्येनालभ्यः आश्रय एव द्वितीयार्थः, न तु क्रियाफले। ततश्च आश्रयत्वं द्वितीयायाः अर्थः। आश्रयत्वञ्च अखण्डशक्तिरूपमवच्छेदकम्।

**कर्मत्वस्य लक्षणम्।**

एवं च "कर्तुरीप्सिततमं कर्म" इति सूत्रस्य कर्तुः क्रियया आप्तुं सम्बद्धुमिष्टततमं कारकं कर्मसंज्ञं स्यादित्यर्थः पर्यवस्यति। सम्बन्धश्च जन्यत्वरूपः, जन्याश्रयत्वरूपो वा। आद्यमादाय धात्वर्थफलस्य, द्वितीयमादाय तण्डुलादेश्च कर्मत्वसिद्धिः। 'गां दोग्धि पयः' इत्यादौ कर्मत्वनिर्वाहाय द्वितीयसम्बन्धस्थले जन्यत्वमपनीय प्रयोज्यत्वं निवेश्यम्।

एवञ्च कर्तृत्वनिष्ठक्रिययाजन्यत्व-जन्याश्रयत्वान्यतरसम्बन्धेन सम्बद्धुमिष्टतमं कारकं कर्मसंज्ञं स्यादिति सूत्रार्थस्वीकारेण धात्वर्थस्य वित्तित्यादेः फलस्य, तदाश्रय-तण्डुलादेश्च कर्मत्वं सूत्राक्षरमर्यादयैव लभ्यते। तत्र जन्याश्रयत्वरूपसम्बन्धमादाय "कर्तृनिष्ठव्यापारजन्यफलाश्रयत्वं कर्मत्वम्" इति व्यवहारः। जन्यत्वरूपसम्बन्धमादाय फलस्य कर्मत्वेन "क्रियाविशेषणानां कर्मत्वम्" इति व्यवहारः।

---

*Assistant Professor, Dept. of Manuscriptlogy, Karnataka Sanskrit University PMK Road, Chamarajpet, Bangalore - 18

"तथायुक्तं चानीप्सितम्"[6] इति सूत्रविहितकर्मणां संग्रहाय 'क्रियाजन्यफलाश्रयः कर्म' इत्येव लक्षणं स्वीकार्यम्। कर्तुरिति सूत्रे सना या इच्छा प्रतीयते तादृशं इच्छोद्देश्यं कर्मसंज्ञायामेवोपयोगि, न तु वाच्यकोटौ तस्य प्रवेशः। तथाहि "कर्मणि द्वितीया" इत्यादिशास्त्रे सर्वविधकर्मणः संग्रहाय एतादृशमेव कर्मलक्षणमुररीकर्तव्यम्। अन्यथा इच्छाविशिष्टे कर्मपदस्य शक्त्यभ्युपगमे तथायुक्तमिति अनिच्छाविशिष्टे पृथच्छक्तिः स्वीकार्येति गौरवं स्यात्। एवञ्च इच्छाघटितमेव लक्षणं न्याय्यम्।

ईप्सित-अनीप्सितत्वयोः शाब्दबोधे भानाभावेन संज्ञायामेव तदुपयोगः, न तु वाच्यकोटौ तयोः प्रवेशः। इत्थञ्च इच्छा-अनिच्छाविषयत्वभानकृतवैरूप्यरहितः शाब्दबोधः "हरिं भजति, ग्रामं गच्छन् तृणं स्पृशति" इत्यादौ जायते। नन्वेवं तर्हि 'कर्त्रा संबद्धं कर्म' इत्येव लक्षमुच्यतामिति चेन्न – "अग्नेर्माणवकं वारयति" इत्यादौ माणवकस्य "वारणार्थानामीप्सितः"इति अपादानत्वं कर्मत्वं प्रबाध्य प्रवर्तेत। कर्तुरीप्सिततममित्युक्ते सति ईप्सितमात्रे सावकाशस्य अपादानत्वस्य ईप्सिततमे परत्वादनेन बाधात् माणवकस्य कर्मत्वं निष्प्रत्यूहं सिध्यति। एवं कर्मसंज्ञायां ईप्सिततमग्रहणस्य आवश्यकत्वे द्वेष्य-उदासीनयोः संग्रहाय "तथायुक्तं..." इत्यादिसूत्रमावश्यकम्।

"ओदनं पचति" इत्यत्र विक्लित्तिरूपफलाश्रयत्वात् ओदनस्य कर्मसंज्ञा। "घटं करोति" इत्यत्र उत्पत्तिरूपफलाश्रयत्वात् घटस्य कर्मता। ननु कृञ् धातुः यत्नार्थकः। यत्नश्च चेतननिष्ठो धर्मः। घटस्तु न यत्नाश्रयः, अचेतनत्वात्। ततश्च घटस्य कर्मत्वं कथमिति चेदाह – कृधातुः उत्पत्त्यनुकूलव्यापारार्थकः, न तु यत्नार्थकः। उत्पत्तिस्तत्र फलम्। तदाश्रयत्वात् घटस्य कर्मत्वम्। 'घटं जानाति' इत्यत्र ज्ञा धातुः आवरणभङ्गानुकूलव्यापारार्थकः। आवरणं नाम अज्ञानम्। तस्य भङ्गः नाशः, अभावो वा। अज्ञानस्य अभावः ज्ञानम्। तेन आवरणभङ्गरूपफलस्य आश्रयत्वात् घटस्य कर्मत्वम् इति प्राचीनमतानुरोधेन। नव्यमते तावत् ज्ञाधातोः ज्ञानानुकूलव्यापारः अर्थः। ज्ञानमेव फलम्। विषयतासम्बन्धेन घटादेः, ज्ञानरूपफलाश्रयत्वात् कर्मत्वम्।

**कर्मत्वलक्षणे अव्याप्त्यतिव्याप्तिदोषसम्भावना, तत्परिहारोपायश्च।**

तथाच **"क्रियाजन्यफलाश्रयत्वं कर्मत्वम्"** इति कर्मत्वलक्षणं पर्यवसितम्। अत्रायमाक्षेपः – ननु "चैत्रो ग्रामं गच्छति" इत्यादौ संयोगानुकूलव्यापारः गम् धात्वर्थः। संयोगः फलम्। तादृशसंयोगरूपफलाश्रयत्वं यथाग्रामे तथा चैत्रेऽपि। संयोगस्य उभयनिष्ठत्वात्। तत्र यथा गमनजन्यसंयोगरूपफलाश्रयत्वात् ग्रामस्य कर्मत्वं तथा चैत्रस्यापि संयोगरूपफलाश्रयत्वात् कर्मत्वे द्वितीयाविभक्तौ सत्यां "चैत्रश्चैत्रं गच्छति" इति प्रयोगापत्तिः। एवं संयोगरूपफलाश्रयत्वेन कर्मसंज्ञायां तदर्थबोधकद्वितीयान्तस्य, संयोगानुकूलव्यापाराश्रयतया कर्तृसंज्ञायां तदर्थबोधप्रथमान्तस्य च एकदैव प्रयोगापत्तिः स्यात्।

किञ्च तत्रैव लक्षणे दोषान्तरमपि प्रसजति यथा – प्रयागे वर्तमानश्चैत्रः प्रयागं त्यक्त्वा यदा काशीं गच्छति तदा 'प्रयागतः काशीं गच्छति' इति प्रयोगे गमनक्रियया यथा संयोगरूपं फलं जायते तद्वत् विभागोऽपि उत्पद्यते। संयोगविभागयोः एकक्रियाजन्यत्वात्। तत्र यथा संयोगाश्रयत्वात् काश्याः कर्मत्वं एवं विभागाश्रयत्वात् प्रयागस्यापि कर्मत्वे तत्प्रयोजकद्वितीयाविभक्तौ सति निरुक्तार्थे 'प्रयागं काशीं गच्छति' इति प्रयोगापत्तिः।

समाधानं तावत् – चैत्रः ग्रामं गच्छतीति प्रयोगे चैत्रस्य फलाश्रयत्वेऽपि न कर्मसंज्ञा। एकस्य एकैव संज्ञेति नियमात्। आकडारादिति शास्त्रवलात् संज्ञयोरपि बाध्यबाधकभावसत्त्वेन परत्वात् चैत्रीयकर्तृसंज्ञया, तदीयकर्मसंज्ञायाः बाधेन फलाश्रयत्वेऽपि कर्मसंज्ञायाः अभावेन चैत्रपदान्न द्वितीया, चैत्रश्चैत्रं गच्छतीति प्रयोगानापत्तिश्च। ननु कर्तृसंज्ञया कर्मसंज्ञायाः बाधेऽपि वस्तुतः फलाश्रयत्वरूपकर्मत्वलक्षण-आक्रान्तत्वात् द्वितीया दुर्वारैव खलु इति चेदाह – द्वितीयोत्पत्तौ संज्ञाया एव नियामकत्वात्। इदमुपलक्षणं कारकविभक्तिमात्रस्य। प्रकृते चैत्रस्य फल्काश्रयत्वेऽपि कर्मसंज्ञायाः अभावात् न ततो द्वितीया। अन्यथा

संज्ञायाः अभावेऽपि कर्मत्वलक्षणसत्तामात्रेण द्वितीयोत्पत्ती "कृष्णं गोकुलं गमयति" इत्यत्रेव "कृष्णेन पाचयति" इत्यत्रापि कृष्णपदात् द्वितीया स्यात्। इष्टा च तत्र तृतीया। अतः द्वितीयाविभक्तेरुत्पत्ती संज्ञायाः नियामकत्वमङ्गीकार्यम्। संज्ञायाः नियामकत्वे तु "गतिबुद्धि....." इत्यादि सूत्रेण "णिजर्थेन आप्यमानस्य यदि कर्मत्वं तर्हि गत्यादिधातुयोगे एव" इति नियमितत्वात् पाचयति योगे प्रयोज्यस्य कर्मत्वाभावात् न प्रयोज्यवाचकात् द्वितीया। किन्तु तदीयकर्तृप्रयुक्ता तृतीयैव। गत्यादियोगे तु प्रयोज्यस्य कर्मत्वात् द्वितीयैवेति विषयविभागः सिध्यति।

द्वितीयदूषणं तावदित्थं परिह्रियते – "प्रयागात् काशीं गच्छति" इत्यत्र प्रयागस्य कर्मत्वं तु न सम्भावनामात्रमपि कर्तुं शक्यते। यतोहि विभागः न गम्धात्वर्थः, किन्तु उत्तरदेशसंयोग एव गम्धातोः वाच्यार्थः। तथा हि क्रियाजन्येत्यनेन समभिव्याहृतधात्वर्थफलशालित्वस्यैव विवक्षणं क्रियते। समभिव्याहृतः अर्थात् प्रसक्तः यो धातुः, तद्धात्वर्थव्यापारजन्यं यत्फलं, तादृशफलशालित्वस्य – फलाश्रयस्य कर्मत्वं विधीयते। प्रकृते समभिव्याहृतो गम्धातुः। तदर्थफलशाली काशी एव भवितुमर्हति, न तु प्रयागः। यतोहि विभागः न गम्धातोः शक्यार्थः, अपि तु उपलक्षितार्थः। यदि विभागोऽपि गम्धात्वर्थ इत्येवाग्रहः तदा निरवकाशत्वात् कर्मत्वं अपादानसंज्ञया बाध्यत इति पञ्चमी निष्कण्टकं प्रवर्तते।

**नैयायिकरीत्या दोषपरिमार्जनरीतिः, तन्निराकरणञ्च।**

चैत्रः चैत्रं गच्छतीत्यत्र दोषवारणाय 'परसमवेतत्वमिति' विशेषणम् उपाददते नैयायिकाः। परशब्दः अन्यवाची। द्वितीयार्थप्रकृतित्वेन विवक्षितार्थ-भिन्नसमवेत-व्यापारजन्य-फलाश्रयस्य कर्मत्वमिति तदर्थः। अर्थाद्यस्य कर्मत्वमिष्टं तदपेक्षया परः भिन्नः, कर्ता, तत्र समवायसम्बन्धेन विद्यमानः यो धातुवाच्यव्यापारः तादृशव्यापारजन्यफलाश्रयस्य कर्मत्वमिति तदर्थः। प्रकृते चैत्रस्तण्डुलं पचतीत्यत्र तण्डुलान्य-चैत्रसमवेतव्यापारजन्य-धात्वर्थतावच्छेदक-विक्लित्तिरूपफलशालित्वात् तण्डुलस्य कर्मता। एतादृशफलशालिकर्मत्वं तण्डुले एव भवितुमर्हति न तु चैत्रे। शाब्दबोधस्तु **तण्डुलसमवेत-धात्वर्थतावच्छेदक-विक्लित्यनुकूल-तण्डुलान्यसमवेत-क्रियाजनककृतिमान् चैत्रः** इति।

ननु परसमवेतत्वस्य विनिगमनाविरहात् फले अन्वये चैत्रभिन्नग्रामसमवेतफलाश्रयत्वात् दोषतादवस्थ्यमिति चेदाह – परसमवेतत्वस्य धात्वर्थक्रियायामन्वयः, न तु फले। अतो न दोषः। ननु परसमवेतत्वंभेदाश्रयसमवेतत्वम्। यत्किञ्चित् भेदस्य सर्वत्रैव सत्त्वात् "मैत्रात् परः चैत्रः" इति चैत्ररूपपरसमवेता या क्रिया तज्जन्य-धात्वर्थतावच्छेदक-संयोगरूपफलाश्रयत्वात् चैत्रस्य कर्मत्वापत्तिः तदवस्थ एव खलु इति चेदाह – परत्वञ्च द्वितीयया स्वप्रकृत्यर्थापेक्षया यः परः सः। तत्समवेतक्रियाजन्यधात्वर्थतावच्छेदक-फलशालित्वं कर्मत्वम् इत्यर्थः अत्राभीप्सितः।

द्वितीयदोषवारणाय "प्रयागात् काशीं गच्छति" इत्यत्र प्रयागस्य विभागाश्रयत्वात् प्राप्तकर्मसंज्ञावारणाय तार्किकैः धात्वर्थतावच्छेदकमिति फलस्य विशेषणत्वेन दीयते, धात्वर्थो यो व्यापारः तत्र अवच्छेदकः विशेषरूपेण विद्यमानं यत्फलं संयोग एव, न तु विभागः, तस्य धात्वर्थत्वाभावात्। अतो न प्रयागस्य कर्मत्वम्। इत्थञ्च तार्किकमते कर्मत्वलक्षणमित्थं पर्यवस्यति – **परसमवेतक्रियाजन्य-धात्वर्थतावच्छेदक-फलशालित्वं कर्मत्वम्** इति।

**नैयायिकमतनिरासः–** परसमवेतत्वस्य धात्वर्थतावच्छेदकत्वस्य च कर्मत्वलक्षणकुक्षिप्रवेशे अनुभवविरोधः, शक्यतावच्छेदकत्वे गौरवापत्तिश्च। परसमवेतत्वस्य द्वितीयार्थत्वं विना चैत्रश्चैत्रं गच्छतीत्यादौ अतिप्रसङ्गः न निरस्येत इति तार्किकाः यद्यब्रवीरन् तर्हि वैयाकरणाः तान् प्रति पप्रच्छुः – अतिप्रसङ्गः किं द्वितीयायाः, उत शाब्दबोधस्य वा इति। नाद्यः परसमवेतत्वस्य द्वितीयायाः वाच्यत्वस्वीकारेऽपि दोषः तदवस्थैव। यथा "गमयति कृष्णं गोकुलम्" इतिवत् "गोपः कृष्णेन पाचयति" इत्यत्रापि द्वितीयापत्तिः स्यात्। तव मते

परसमवेतत्वादि लक्षणाङ्गीकारे आद्योदाहरणे परसमवेतकृष्णान्यगोपसमवेता क्रिया – उत्तसदेशसंयोगानुकूलानुकूला क्रिया, तादृशक्रियाजन्यं यत् धात्वर्थतावच्छेदकं फलं – संयोगानुकूलव्यापारः, तदाश्रयत्वात् कृष्णस्य कर्मत्वं सेत्स्यति। तद्वत् द्वितीयवाक्ये गोपः कृष्णेन पाचयतीत्यत्रापि स्वभिन्न – कृष्णभिन्नप्रयोजक- गोपान्यसमवेता या विक्लित्त्यनुकूला क्रिया तज्जन्य- धात्वर्थतावच्छेदकीभूतं यत् विक्तित्त्यनुकूलरूपं फलं तच्छालित्वात् कृष्णस्य कर्मत्वं तदाश्रयायाः द्वितीयायाः आपत्तिश्च। इष्यते च तत्र तृतीया।

ननु गतिबुद्धि.....इत्यादि सूत्रोपात्तधातुविषये एव प्रयोज्यस्य कर्मत्वविवक्षा बोध्यत इति पूर्वोक्तोदाहरणे दोषः नास्तीति चेत् स्थलान्तरमाह – चैत्रस्तण्डुलं पचतीत्यत्र यथा पच्धात्वर्थतावच्छेदकविक्लित्तिरूपफलशालित्वेन तण्डुलानां कर्मत्वं सिध्यति एवं "तण्डुलः पच्यते स्वयमेव" इत्यादौ कर्मकर्तरिप्रयोगेऽपि विक्तित्त्याश्रयत्वेन तण्डुलस्य द्वितीया स्यात्। वैयाकरणनये तु कर्मणः कर्तृत्वविवक्षया धात्वर्थव्यापाराश्रयत्वेन परत्वात् कर्तृसंज्ञया कर्मसंज्ञायाः बाधात् नास्त्यनुपपत्तिः। यगादिकन्तु भवत्येव "कर्मवत्कर्मणा तुल्यक्रियः"[7]इति कर्मप्रत्यय-प्रयोज्यकार्यस्य अतिदेशात्, न च कर्मकर्तृविवक्षायां "तण्डुलः पच्यते" इत्यादौ तण्डुले परसमवेतक्रियाजन्य-फलाश्रयत्वाभावात् न द्वितीयेति वाच्यम्। तस्मिन् प्रयोगे अग्निसंयोगस्यापि पच्धात्वर्थतया तण्डुलभिन्न-काष्ठवृत्ति-अग्निसंयोगरूप-क्रियाजन्य-फलाश्रयतया द्वितीयापत्तेः सुवचत्वात्।

न द्वितीयः। शाब्दबोधातिप्रसङ्गोऽपि उक्तरीत्या – विपरीतशक्तिग्रहवतां तथा बोधस्य इष्टापत्तेः, धावर्थव्यापारानधिकरण-आश्रयोपस्थितिरिति निरुक्तरीत्या ध्वस्तः। किञ्च परसमवेतत्वस्य शक्यत्वेऽपि परत्वस्य परसमवेतत्वस्य च इष्टान्वयलाभाय परत्वं द्वितीयाप्रकृत्यपेक्षया, परसमवेतत्वं च धात्वर्थक्रियायामेवान्वेति, न फले इति अभीष्टार्थसंपत्तये अनेकशः कार्य-कारणभावाः अभ्युपगन्तव्याः इति गौरवात् तार्किकमतं नाङ्गीकुर्वन्ति शाब्दिकाः।

**आकरग्रन्थसूची :**

1. कौण्डभट्टविरचितः भूषणसारः।
2. नागेशभट्टविरचितः लघुशब्देन्दुशेखरः।
3. भट्टोजिदीक्षितविरचिता सिद्धान्तकौमुदी।
4. व्याकरणमहाभाष्यम्।
5. परमलघुमञ्जूषा।
6. लघुमञ्जूषा।
7. प्रौढमनोरमा।

---

सन्दर्भ :

1. पा. सू.१-४-४९
2. भूषणसारः, सुवर्थप्रकरणम्
3. पा. सू. २-३-२
4. पा. सू. २-३-६७
5. पा. सू. ३-२-१८८
6. पा. सू. १-४-५०
7. पा. सू. ३ – १- ८७

ॐ ISSN 2250-1711

सत्यं ज्ञानमनन्तम्

# Journal of Veda Samskṛta Academy

**Recognised in the UGC-CARE List**

**A National Peer-Reviewed Research Journal**

विश्वविद्यालय-अनुदान-आयोगेन केर सूच्यां मानिता

मूल्याङ्किता राष्ट्रियसंशोधनपत्रिका

Volume : XIX
January to June - 2022



॥ पातु विश्वं महाबलः ॥ = श्रीक्षेत्र गोकर्ण, कर्नाटक

*Edited by the Director :*

**Dr. Gopalkrishna Hegde**

Jyotishashastra-Dharmashastra Vidwan

**VEDA SAMSKRITA ACADEMY (R.)**
Kalkod Road, Hegde - 581330, KUMTA, Uttara Kannada, Karnataka.

Title of the Journal : **Journal of Veda Samskrita Academy**
Recognised in the UGC-CARE List
A National Peer-Reviewed Research Journal

जर्नल् आफ् वेद संस्कृत अकाडेमि
विश्वविद्यालय-अनुदान-आयोगेन केर सूच्यां मानिता
मूल्याङ्किता राष्ट्रियसंशोधनपत्रिका

**ISSN : 2250-1711**

Editor & Publisher : **Dr. Gopalkrishna Hegde**
gopalkrishnh9@gmail.com
9741847399
Director,
Veda Samskrita Academy (Regd.)
Kalkod Road, HEGDE- 581330
Kumta, Uttara Kannada, Karnataka
web site : www.vedasamskritaacademy.org
E-mail : vedasmkac@gmail.com

All rights are Reserved with the Publisher

" All opinion / views expressed in the research papers are of the authors only, no way they are ascribed to the Academy"

Languages : Samskrita, Kannada, English, Hindi
Imprint : Volume XIX, January to June – 2022
Paper : 70gsm (B2B) and Art paper – 300gsm

Size of the Journal : A4
Number of Pages : 250 + 12 + 3 (colour page)
Number of Copies : 200
D. T. P. : Pavan Graphics, Hegde
Art works : Girish R. Bhat, Digital World
Printing & Binding : Shri Krishna Mudranalaya, Hegde

Price : **Rs. 500/-**

| | | |
|---|---|---|
| 41. | **The problem of purusa-prakrti interaction in samkhya and its inevitability**<br>**Dr. Rajeevan E**, Kerala- 9495811886 | 161-165 |
| 42. | **Indian Cultural Heritage and its Transnational Transaction : A Philosophical Investigation**<br>**Dr. Nasiruddin Mondal**, West Bengal- 9434229410 | 166-170 |
| 43. | **Book review on Kakachandeeswara Kalpa Tantram**<br>**Dr. Gopikrishnan. P. T.**, Kerala- 8301927520 | 171-174 |
| 44. | **Mapping the Arena of Divine and Toxic Love: A Mythical Re-interpretation of Madhav & Tulsi in K R Meera's *The Poison of Love***<br>**Seba Susan John**, Thanjavur, Tamil Nadu- 9497187902 | 175-177 |
| 45. | **Importance of Appaya's Commentary: In the light of Śāktopaniṣad**<br>**Dr. Deepashree Mondal**, West Bengal- 9614136506 | 178-181 |
| 46. | **Transcending gender and moralities of equality : A critical study of Deshpande's roots and shadow**<br>**T.Vijaya M. A.**, Tamil Nadu- 9865680337 | 182-184 |
| 47. | **Panchatantra & Ukraine War [ A comparative study ]**<br>**Dr. Geetha R.**, Bengaluru, Karnataka- 9886540824 | 185-187 |
| 48. | **Cultural Imbroglio, Ecological Downfall, and Conflict of Social System in the Select Novels of Amitav Ghosh's Fiction**<br>**K. Divya**, Tamil Nadu- 9994742670 | 188-191 |
| 48. | **Ayurveda Darsana- A Unique Independent School of Thought- A Conceptual Review**<br>**Dr. Devi M**, Kerala- 8921292326 | 192-196 |
| 49. | **A Book Review on Anjana Nidanam**<br>**Dr. Keerthi P.** Kerala- 9538728637 | 197-200 |
| 50. | **Mapping Urali Culture: A Socio-Historical Pursuit**<br>**Veena R. Nair**, Kerala- 8086879090 | 201-204 |
| 51. | **Role of Kala as a Vyadhihetu in Shiftworkers**<br>**Dr. Lekshmy M L**, Amritapuri, Kerala- 9496370181 | 205-210 |
| 52. | **Depict the environmentala aesthetics and negotiation of mankind in the selective modern nigerian poetry**<br>**Keerthana K**, Kerala- 9442805945 | 211-214 |
| 53. | **Socio-Cultural Discernment of Visual Clues in *Munthirivallikal Thalirkkumbol***<br>**T. P. Remadevi**, Tamil Madu- 9497061237 | 215-218 |
| 54. | ***Saṁbhūya-Samutthāna* : Hindu Law of Partnership**<br>**Dr. Anagha Joshi**, Pune, Maharashtra- 9850642768 | 219-221 |
| 55. | **Significance of Utsargapavada Nyaya in Understanding the Ayurvedic Concepts of Charaka Samhita in Context to Ayurveda Deepika commentary of Chakrapani**<br>**Samar Kumar Parhi**, Ph. D. Scholar, University of Hyderabad, 7735365383 | 222-225 |
| 56. | ಶಿವತತ್ತ್ವ ರತ್ನಾಕರ ಒಂದು ಕೋಶಗ್ರಂಥ<br>**Nagesh S. Dongare, M.A., K.E.S.**, Shivamogga, Karnataka- 9448775992 | 226-230 |
| 57. | ಋಗ್ವೇದದಲ್ಲಿ ವಿದ್ಯೆಯ ಮಹತ್ವ<br>**Dr. Ishwar Prasad A.**, Hasan, Karnataka - 9900766285 | 231-235 |
| 58. | ಕಾಳಿದಾಸನ ಕಾವ್ಯಗಳಲ್ಲಿ ಸೂಕ್ತಿಗಳು<br>**Vidushi Savitri Pujari**, Bengaluru, Karnataka- 9972835365 | 236-239 |
| 59. | ಭಗವದ್ಗೀತೋಪದೇಶದ ಉದ್ದೇಶ ಮತ್ತು ಮಹತ್ವ<br>**Vidwan R. Jagannatha Pujar**, Bengaluru, Karnataka- 9036143822 | 240-243 |
| 60. | ಧರ್ಮಶಾಸ್ತ್ರದಲ್ಲಿ ಸ್ತ್ರೀ ಸ್ವಾತಂತ್ರ್ಯ – ಒಂದು ವಿವೇಚನೆ<br>**Vidwan Ganapati Bhat**, Mysuru, Karnataka- 9449979609 | 244-247 |
| 61. | ಲಿಪಿಯ ಪ್ರಾಚೀನತೆ<br>**Dr. Ramakrishna Bhat K**, Bengaluru, Karnataka- 9844741855 | 248-250 |


**********

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# ಲಿಪಿಯ ಪ್ರಾಚೀನತೆ

**Dr. Ramakrishna Bhat K**
HOD, Department of Manuscriptology
Karnataka Samskrita University
PMK Road, Chamaraja Pete-560018
Bengaluru, Karnataka
Contact No.: 9844741855
E-mail : kootelubhat@gmail.com

ಮನುಷ್ಯನ ಬದುಕಿನಲ್ಲಿ ಭಾಷೆ ಮತ್ತು ಲಿಪಿ ಎಂಬೆರಡು ಅಂಶಗಳು ಅತ್ಯಂತ ಮಹತ್ವವನ್ನು ಪಡೆಯುತ್ತವೆ. ತನ್ನಲ್ಲಿರುವ ಭಾವನೆಯನ್ನು ಯಥಾವತ್ತಾಗಿ ಇನ್ನೊಬ್ಬನಿಗೆ ತಿಳಿಸಲು ಭಾಷೆ ಅತ್ಯಂತ ಅಗತ್ಯ. ಸಂಸ್ಕೃತ ಸಾಹಿತ್ಯದಲ್ಲಿ ಮಹಾಕವಿಯೆನಿಸಿದ ದಂಡಿಯು ಭಾಷೆಯ ಕುರಿತಾಗಿ ಈ ರೀತಿಯಾಗಿ ಅಭಿಪ್ರಾಯ ವ್ಯಕ್ತಪಡಿಸುತ್ತಾನೆ :

ಇದಮಂಧಂತಮಃ ಕೃತ್ಸ್ನಂ ಜಾಯೇತ ಭುವನತ್ರಯಮ್ । ಯದಿ ಶಬ್ದಾಹ್ವಯಂ ಜ್ಯೋತಿರಾಸಂಸಾರಂ ನ ದೀಪ್ಯತೇ॥[1]

ಈ ಪ್ರಪಂಚದಲ್ಲಿ ಶಬ್ದವೆಂಬ ಜ್ಯೋತಿ ಇಲ್ಲದೇ ಹೋಗಿದ್ದಿದ್ದರೆ ಪ್ರಪಂಚವೇ ಕತ್ತಲಿನಿಂದ ಕೂಡಿರುತ್ತಿತ್ತು. ಹೇಗೆ ಪ್ರಾಣಿಗಳ ಬದುಕು ಸಾಗುತ್ತದೆಯೋ ಅದೇ ರೀತಿಯಾಗಿ ಮನುಷ್ಯನ ಬದುಕು ಕೂಡ ಇರುತ್ತಿತ್ತು. ಆದರೆ ತನ್ನ ಅಭಿಪ್ರಾಯವನ್ನು ಯಥಾವತ್ತಾಗಿ ಇನ್ನೊಬ್ಬನಿಗೆ ತಿಳಿಸಿ ಜ್ಞಾನಪ್ರಸಾರಕ್ಕೆ ಕಾರಣವಾದುದೇ ಮಾತಾಗಿದೆ. ಇಂಥಹ ವಾಕ್ಕಿನ ಮುಖ್ಯ ಉದ್ದೇಶ ಧರ್ಮಸಂಗ್ರಹ ಎಂಬುದು ಹಾಗೂ ಇಂಥಹ ಅಮೃತ ಸದೃಶ ವಸ್ತುವನ್ನು ಭಗವಂತನೇ ಸೃಷ್ಟಿಸಿದನು ಎಂಬುದು ಭಾರತೀಯ ಸಿದ್ಧಾಂತ.[2] ಈ ಲಿಪಿಯ ಹುಟ್ಟಿನ ಬಗ್ಗೆ ಅನೇಕ ಸಂಶೋಧನೆಗಳು ನಡೆದಿವೆ. ದೇಶ ವಿದೇಶಗಳಲ್ಲಿ ಈ ವಿಚಾರವಾಗಿ ನೂರಾರು ಗ್ರಂಥಗಳು ರಚಿತವಾಗಿವೆ. ಲಿಪಿಯ ವಿಚಾರದಲ್ಲಿ ಸನಾತನ ಸಿದ್ಧಾಂತವು ಈ ರೀತಿಯಾಗಿದೆ : ಮನುಷ್ಯನ ಪ್ರತಿಯೊಂದು ಚಟುವಟಿಕೆಯೂ ಧರ್ಮಸಂಗ್ರಹಕ್ಕೆ ಪೂರಕವಾಗಿರಬೇಕು ಎಂಬುದು ಶ್ರುತಿ – ಸ್ಮೃತಿಗಳಿಂದ ತಿಳಿಯುತ್ತೇವೆ. ಧರ್ಮಸಂಗ್ರಹ-ಕ್ಕಾಗಿ ಇರುವ ವಾಕ್ಕಮೂಲಕ ತಿಳಿದ ವಿಚಾರವನ್ನು ದೀರ್ಘಕಾಲದವರೆಗೆ ನೆನಪಿನಲ್ಲಿಟ್ಟುಕೊಳ್ಳಲು ಅಸಾಧ್ಯವಾದ ಕಾರಣ ಭಗವಂತನೇ ಲಿಪಿಯನ್ನು ಸೃಷ್ಟಿಸಿದನು. ಆದ್ದರಿಂದ ಲಿಪಿಯ ಉದ್ದೇಶವೂ ಧರ್ಮಸಂಗ್ರಹವಾಗಿದೆ.

ಷಾಣ್ಮಾಸಿಕೇತಿ ಸಮಯೇ ಭ್ರಾಂತಿಃ ಸಂಜಾಯತೇ ಯತಃ । ಧಾತ್ರಾಕ್ಷರಾಣಿ ಸೃಷ್ಟಾನಿ ಪತ್ರಾರೂಢಾನ್ಯತಃ ಪುರಾ ॥[3]

ಎಂಬುದಾಗಿ ಸ್ಮೃತಿಯಲ್ಲಿ ಉಲ್ಲೇಖವಿದೆ, ಅಂದರೆ ಮನುಷ್ಯನು ಕಿವಿಯಿಂದ ಕೇಳಿದ ಮಾತು ಆರು ತಿಂಗಳುಗಳಲ್ಲಿಯೇ ಮರೆತು ಹೋಗುತ್ತದೆ, ಆದ್ದರಿಂದ ತನ್ನ ಮನಸ್ಸಿನ ಭಾವನೆಗಳು, ವಿಚಾರಗಳು ದೀರ್ಘಕಾಲ ಇನ್ನೊಬ್ಬರಿಗೆ ಸಿಗಬೇಕೆಂಬ ಉದ್ದೇಶದಿಂದ ಬರವಣಿಗೆಯ ಸೃಷ್ಟಿಯಾಯಿತು. ಇದನ್ನೇ ಲಿಪಿ ಎಂದು ಕರೆಯಲಾಗುತ್ತದೆ. ಈ ಲಿಪಿಯ ಸೃಷ್ಟಿ ಕರ್ತಾ ಬ್ರಹ್ಮನೇ ಆಗಿದ್ದಾನೆ ಎಂಬುದು ಆಸ್ತಿಕರ ಸಿದ್ಧಾಂತ. ನಾರದಸ್ಮೃತಿಯಲ್ಲಿ

ನಾಕರಿಷ್ಯದ್ಯದಿ ಬ್ರಹ್ಮಾ ಲಿಖಿತಂ ಚಕ್ಷುರುತ್ತಮಮ್ ।
ತತ್ರಾಯಮಸ್ಯ ಲೋಕಸ್ಯ ನಾಭವಿಷ್ಯಚ್ಛುಭಾಗತಿಃ ॥[4]

ನೋಟಕ್ಕೆ ಹಿತವಾದ ಲಿಪಿಯನ್ನು ಬ್ರಹ್ಮನು ಸೃಷ್ಟಿಸದೇ ಇದ್ದಿದ್ದರೆ ಲೋಕಕ್ಕೆ ಶುಭಗತಿ ಇರುತ್ತಿರಲಿಲ್ಲ ಎಂಬುದಾಗಿ ಹೇಳಿದ್ದಾರೆ. ಸಂಸ್ಕೃತದ ಲಿಪ' ಎಂಬ ಧಾತುವಿನಿಂದ ನಿಷ್ಪನ್ನವಾದ ಶಬ್ದ ಲಿಪಿ ಎಂಬುದಾಗಿದೆ.

---

1. ಕಾವ್ಯಾದರ್ಶ ।
2. ದೇವೀಂ ವಾಚಮಜನಯಂತ ದೇವಾಃ । ಋ. ಸಂ. 6/7/5 ।
3. ಬಾರ್ಹಸ್ಪತ್ಯಸ್ಮೃತಿಃ, 1. 3 ।
4. ನಾರದಸ್ಮೃತಿಃ, 4–70 ।

ಲಿಪಿ ಎಂದರೆ ನಿರ್ದಿಷ್ಟವಾದ ವ್ಯವಸ್ಥಿತವಾದ ರೇಖಾ ವಿನ್ಯಾಸ ಎಂದರ್ಥ,

ಲೇಖನ ವಿಚಾರವು ಪ್ರಪಂಚದಲ್ಲೇ ಅತ್ಯಂತ ಪ್ರಾಚೀನ ಸಾಹಿತ್ಯವಾದ ವೇದದಲ್ಲಿ ಕಂಡುಬರುತ್ತದೆ. ಕೃಷ್ಣಯಜುವೇದ ತೈತ್ತಿರೀಯ ಶಾಖೆಯ ಐದನೆಯ ಕಾಂಡದ ಮೊದಲ ಪ್ರಶ್ನೆಯ ಮೂರನೆಯ ಅನುವಾಕದಲ್ಲಿ :ಗಾಯತ್ರಿ ಯಾ ಪರಿಲಿಖಿತಿ ತೇಜೋ ವೈ ಗಾಯತ್ರೀ ತೇಜಸ್ಯೈವೈನಂ ಪರಿಗೃಹ್ಣಾತಿ ತ್ರಿಷ್ಟುಭಾ ಪರಿಲಿಖತೀಂದ್ರಿಯಂ ವೈ ಎಂದು ಲಿಖ್ಧಾತುವಿನ ಪ್ರಯೋಗ ಕಂಡುಬರುತ್ತದೆ. ಪಾಣಿನಿಯ ಅಷ್ಟಾಧ್ಯಾಯಿಯಲ್ಲಿ "ಲಿಪಿಸಿಚಿಕ್ಷಶ್ಚ[5] ಹಾಗೂ ದಿವಾ ವಿಭಾ ನಿಶಾ[6]. –ಎಂಬ ಸೂತ್ರದಲ್ಲಿಯೂ ಲಿಪಿ ಶಬ್ದ ಪ್ರಯೋಗವಿದೆ. ಪಾಣಿನಿಯ ಕಾಲ ಕ್ರಿ.ಪೂ. 7ನೆಯ ಶತಮಾನವೆಂದು ಸಂಶೋಧಕರು ನಿರ್ಣಯಿಸಿದ್ದಾರೆ. ಕಾಳಿದಾಸನ 'ಅಭಿಜ್ಞಾನ ಶಾಕುಂತಲದಲ್ಲಿ ಮೂರನೆಯ ಅಂಕದಲ್ಲಿ :ಏತಸ್ಮಿನ್ನುಕೋದರಸುಕುಮಾರೇ ನಲಿನೀಪತ್ರೇ ಪತ್ರಚ್ಛೇದಭಕ್ತ್ಯಾ ನಖೈರ್ನಿಕ್ಷಿಪ್ತವರ್ಣಂ ಕುರು ॥[7] ಎಂದು ಪ್ರಿಯಂವದೆಯು ಹೇಳುವ ಮಾತಿದೆ. ಇಲ್ಲಿಯೂ ಬರವಣಿಗೆಯ ಬಗೆಗೆ ಉಲ್ಲೇಖವಿದೆ. ಕಾಳಿದಾಸನ ಕಾಲ ಕ್ರಿಪೂ 5ನೆಯ ಶತಮಾನವೆಂದು ಅಭಿಪ್ರಾಯಪಟ್ಟಿದ್ದಾರೆ. ಹಾಗೆಯೇ ಕ್ರಿ.ಪೂ ಮೂರನೆಯ ಶತಮಾನದಲ್ಲಿದ್ದ ಚಾಣಕ್ಯನ ಅರ್ಥಶಾಸ್ತ್ರದಲ್ಲಿ ಶಾಸನಾಧಿಕಾರವೆಂಬ ಒಂದು ಅಧ್ಯಾಯವೇ ಇದೆ. ಅದೇ ರೀತಿಯಾಗಿ ಶುಕ್ರನೀತಿಯಲ್ಲಿ ಲೇಖನದ ಬಗ್ಗೆ ಅನೇಕ ವಿಧಪತ್ರಗಳ ಬಗ್ಗೆ ಅತಿವಿಸ್ತಾರವಾಗಿ ಹೇಳಿದೆ. ಪ್ರಪಂಚದ ಆದಿಕಾವ್ಯವೆನಿಸಿದ ಶ್ರೀಮದ್ವಾಲ್ಮೀಕಿರಾಮಾಯಣದಲ್ಲಿ ಆಂಜನೇಯನು ಸೀತಾನ್ವೇಷಣೆಗಾಗಿ ಲಂಕೆಗೆ ಹೋಗಿದ್ದಾಗ ಈ ಮಾತನ್ನು ಹೇಳುತ್ತಾನೆ :

ವಾನರೋಹಂ ಮಹಾಭಾಗೇ ದೂತೋ ರಾಮಸ್ಯ ಧೀಮತಃ।
ರಾಮನಾಮಾಂಕಿತಂ ಚೇದಂ ಪಶ್ಯ ದೇವ್ಯಂಗುಲೀಯಕಮ್ ॥ [8]

ಇಲ್ಲಿ ಆಂ9ಜನೇಯನು ಶ್ರೀರಾಮನ ಹೆಸರು ಮುದ್ರಿತವಾಗಿದ್ದ ಉಂಗುರವನ್ನು ತೋರಿಸುತ್ತಾನೆ, ಅಂದರೆ ರಾಮಾಯಣಕಾಲದಲ್ಲಿ ಬರವಣಿಗೆಯ ಪದ್ಧತಿ ಸ್ಪಷ್ಟವಾಗಿ ಬಳಕೆಯಲ್ಲಿತ್ತೆಂದು ತಿಳಿಯಬಹುದು. ಮಹಾಭಾರತದಲ್ಲಿಯೂ

ಲೇಖ್ಯಕೋ ಭಾರತಸ್ಯಾಸ್ಯ ಭವತ್ವಂ ಗಣನಾಯಕ। ಮಯ್ಯೆವ ಪ್ರೋಚ್ಯಮಾನಸ್ಯ ಮನಸಾ ಕಲ್ಪಿತಸ್ಯ ಚ ॥[9]

ಎಂಬುದಾಗಿ ವ್ಯಾಸರು ಗಣಪತಿಯನ್ನು ಲೇಖಕನಾಗಿರಬೇಕೆಂದು ಕೇಳಿಕೊಂಡ ಸನ್ನಿವೇಶವಿದೆ. ಈ ಆಧಾರ-ದಿಂದಲೂ ಮಹಾಭಾರತದಕಾಲದಲ್ಲಿಯೂ ಲಿಪಿ ಇತ್ತೆಂದು ಹೇಳಬಹುದು.

ಇನ್ನು ವಾರಾಹೀತಂತ್ರ, ಯೋಗಿನೀತಂತ್ರ ಮೊದಲಾದ ತಂತ್ರಗಂಥಗಳಲ್ಲೂ ಲಿಪಿಯ ಬಗ್ಗೆ ಹೇಳಿದ್ದಾರೆ. ಒಟ್ಟಿನಲ್ಲಿ ವೇದಕಾಲದಿಂದಲೇ ಭಾರತದಲ್ಲಿ ಲಿಪಿಯ ಬಳಕೆ ಇತ್ತು ಎಂಬುದನ್ನು ನಾವು ಕಾಣಬಹುದು.

ಬೌದ್ಧರ ಗ್ರಂಥವಾದ ಲಲಿತವಿಸ್ತರದಲ್ಲಿ 14 ಲಿಪಿಗಳ ಉಲ್ಲೇಖವಿದೆ. ಜೈನರ ಪ್ರಕಾರ ಲಿಪಿಯ ಸೃಷ್ಟಿಕರ್ತಾ ಆದಿತೀರ್ಥಂಕರರೆನಿಸಿದ ವೃಷಭದೇವ. ದೃಷಭದೇವನು ತನ್ನ ಮಗಳಾದ ಬ್ರಾಹ್ಮಿಗೆ ಮೊದಲು ಲಿಪಿಯನ್ನು ಬೋಧಿಸಿದ್ದರಿಂದ ಮೊದಲ ಲಿಪಿಗೆ ಬ್ರಾಹ್ಮೀ ಲಿಪಿ ಎಂಬ ಹೆಸರು ಬಂದಿದೆ ಎಂಬುದು ಜೈನರ ವಾದವಾಗಿದೆ. ಹೀಗೆ ಭಾರತದಲ್ಲಿನ ವಿವಿಧ ಮತಪ್ರವರ್ತಕರ ಪ್ರಕಾರವೂ ಲಿಪಿಯ ಸೃಷ್ಟಿಯ ಭಗವಂತನಿಂದಲೇ ಆಯಿತೇ ಹೊರತು ಮನುಷ್ಯ
ನಿರ್ಮಿತವಲ್ಲ. ಸೃಷ್ಟಿಯ ಆರಂಭದಿಂದಲೇ ಲಿಪಿಯೂ ಇತ್ತೆಂಬುದನ್ನು ನೋಡಿದಾಗ ತಿಳಿಯುವುದು ಆದರೆ ಲಿಪಿಯ ಸ್ವರೂಪ ಯಾವುದಾಗಿತ್ತೆಂಬುದು ಮಾತ್ರ ತಿಳಿಯದು. ಇದಕ್ಕೆ ಯಾವುದೇ ಆಧಾರಗಳು ಲಭ್ಯವಾಗುತ್ತಿಲ್ಲ.

---

5. ಅಷ್ಟಾಧ್ಯಾಯೀ, 3–1–55 ।
6. ಅಷ್ಟಾಧ್ಯಾಯೀ, 3–2–21 ।
7. ಅ. ಶಾ., 3 ।
8. ರಾಮಾಯಣಮ್, 5–36–02 ।
9. ಮಹಾಭಾರತಮ್, 1–1–95 ।

ನಮಗೀಗ ದೊರೆಯುವ ಲಿಪಿಗಳಲ್ಲಿ ಅತ್ಯಂತ ಪ್ರಾಚೀನ ಲಿಪಿಯೆಂದರೆ ಸಿಂಧೂಲಿಪಿ, ಈ ಲಿಪಿಯನ್ನು ಸಮರ್ಥವಾಗಿ ಇಂದಿಗೂ ಓದಲಾಗಲಿಲ್ಲ. ಬಹುತೇಕ ಚಿತ್ರಲಿಪಿಯ ರೂಪವನ್ನು ಹೊಂದಿದೆ ಎನ್ನಬಹುದು. ಅಲ್ಲದೆ ಸಂಕೇತಾಕ್ಷರಗಳ ರೂಪದಲ್ಲಿಯೂ ದೊರಕುತ್ತವೆ.

ನಮಗೆ ಸ್ಪಷ್ಟವಾಗಿ ಗೋಚರವಾಗುವ ಲಿಪಿಯೆಂದರೆ ಬ್ರಾಹ್ಮಿಲಿಪಿ. ಕ್ರಿ.ಪೂ 3ನೆಯ ಶತಮಾನದಲ್ಲಿ ಅಶೋಕನ ಶಾಸನಗಳಲ್ಲಿ ಈ ಲಿಪಿಯನ್ನು ಕಾಣಬಹುದು. 39 ವರ್ಣಗಳಿಗೆ ಲಿಪಿಯು ದೊರೆಯುತ್ತವೆ. ಅಶೋಕನ ಕಾಲಕ್ಕಿಂತಲೂ ಪೂರ್ವದ ನಾಣ್ಯಗಳಲ್ಲಿ ಲಿಪಿ ಸಿಕ್ಕಿದರೂ ವಾಕ್ಯಾತ್ಮಕವಾದ ವಿಸ್ತಾರವಾದ ಲಿಪಿಸ್ವರೂಪವು ಅಶೋಕನ ಶಾಸನಗಳಿಂದಲೇ ಲಭ್ಯವಾಗುತ್ತವೆ. 1836 ರಲ್ಲಿ ಲ್ಯಾಸೆನ್ ಎಂಬ ವಿದ್ವಾಂಸರು ಇಂಡೋ ಬ್ಯಾಕ್ಟ್ರಿಯನ್ ಅರಸನಾದ ಅಗಾಥೋಕ್ಲಿಸ್ನ ನಾಣ್ಯಗಳ ಮೇಲಿನ ಬ್ರಾಹ್ಮಿಲಿಪಿಯನ್ನು ಸಮರ್ಪಕವಾಗಿ ಮೊಟ್ಟ ಮೊದಲಿಗೆ ಓದಿದನು, ಆದರೆ ಪರಿಪೂರ್ಣವಾಗಿ ಬ್ರಾಹ್ಮೀ ವರ್ಣಮಾಲೆ-ಯನ್ನು ತೋರಿಸಿಕೊಟ್ಟವನು ಜೇಮ್ಸ್ಪ್ರಿನ್ಸೆಪ್. ಇವನು ಬ್ರಾಹ್ಮೀವರ್ಣಮಾಲೆನ್ನು ಪರಿಚಯಿಸಿದ ಲಾಗಾಯ್ತು ಭಾರತದಲ್ಲಿನ ಎಲ್ಲಾ ಶಾಸನಗಳ ಸಂಶೋಧನೆ ಆರಂಭವಾಯಿತು. ಈ ಬ್ರಾಹ್ಮೀ ಲಿಪಿಗೂ ವಿದೇಶೀಲಿಪಿಗಳೇ ಮೂಲವೆನ್ನುವ ವಾದವಿದ್ದರೂ ಸಾಧಾರವಾಗಿ ನಿರೂಪಿಸಲು ಯಾರಿಗೂ ಸಾಧ್ಯವಾಗಿಲ್ಲ.

ವೇದಗಳಲ್ಲಿ ಲಿಪಿಯ ಬಗ್ಗೆ ಉಲ್ಲೇಖವಿದೆಯಾದರೂ ಲಿಪಿಯ ಸ್ವರೂಪ ಲಭ್ಯವಾಗುತ್ತಿಲ್ಲ. ಆದರೆ ಅಶೋಕನ ಕಾಲದಲ್ಲಿ ದೊರೆತ ಬ್ರಾಹ್ಮಲಿಪಿಯ ಸ್ವರೂಪವೇ ಲಿಪಿಗಳ ಮೂಲ ಎಂದು ಹೇಳಬಹುದು. ಅಶೋಕನು ಅಷ್ಟೊಂದು ಸ್ಪಷ್ಟವಾಗಿ ಬರೆಸಿದ್ದರಿಂದ ಅದಕ್ಕಿಂತ ಪೂರ್ವದಲ್ಲಿಯೇ ಆ ಲಿಪಿ ಅತ್ಯಂತ ಪ್ರಚಾರದಲ್ಲಿದ್ದಿರಲೇಬೇಕು, ಜನರಿಗೆ ಅರ್ಥವಾಗದ ಲಿಪಿಯಲ್ಲಿ ಬರೆಸಿದರೆ ಆ ಶಾಸನಗಳಿಂದ ಪ್ರಯೋಜನವೇ ಇರುವುದಿಲ್ಲ. ಆದ್ದರಿಂದ ಲಿಪಿಯ ಮೂಲಸ್ವರೂಪ ಬ್ರಾಹ್ಮಿಲಿಪಿಯ ಸ್ವರೂಪವೆಂದು ಹೇಳಬಹುದು.

ಆದರೆ ಕಾಲಕಾಲಕ್ಕನುಗುಣವಾಗಿ ಲಿಪಿಯಲ್ಲಿ ಸಾಕಷ್ಟು ಬದಲಾವಣೆಯಾದುದನ್ನು ನಾವು ಕಾಣುತ್ತೇವೆ. ಅಶೋಕನ ಕಾಲದ ಬ್ರಾಹ್ಮಿಲಿಪಿಯು ಶಾತವಾಹನರ ಕಾಲಕ್ಕೆ (ಕ್ರಿ.ಶ.1-1) ಬಂದಾಗ ಸ್ವಲ್ಪದೀರ್ಘರೂಪವನ್ನು ಪಡೆಯಿತು. ಅನಂತರ ಕದಂಬರ ಕಾಲದಲ್ಲಿ (ಕ್ರಿ.ಶ 1-5), ಬಾದಾಮಿ ಚಾಲಿಕ್ಯರ ಕಾಲದಲ್ಲಿ (ಕ್ರಿ.ಶ 1) ರಾಷ್ಟ್ರಕೂಟರ ಕಾಲದಲ್ಲಿ (ಕ್ರಿ.ಶ 7-10) ಕಲ್ಯಾಣ ಚಾಲುಕ್ಯರ ಕಾಲದಲ್ಲಿ (ಕ್ರಿ.ಶ 10-11) ಹೊಯ್ಸಳರ ಕಾಲದಲ್ಲಿ (ಕ್ರಿಶ 11-13) ವಿಜಯನಗರ ಅರಸರ ಕಾಲದಲ್ಲಿ (ಕ್ರಶ 14-16) ಮೈಸೂರು ಒಡೆಯರ ಕಾಲದಲ್ಲಿ (ಕ್ರಿ.ಶ 17 18) .ಹೀಗೆ ಬದಲಾವಣೆ ಹೊಂದಿ ಇಂದಿನ ಕನ್ನಡಲಿಪಿಯ ಸ್ವರೂಪ ಹೊಂದಿದೆ.

ಕಾಲಕಾಲಕ್ಕೆ ಲಿಪಿ ಬದಲಾವಣೆಯಾಗಲು ಅನೇಕ ಕಾರಣಗಳಿವೆ. ಲಿಪಿಕಾರನ ಬರವಣಿಗೆಯ ಶೈಲಿಯಿಂದಾಗಿ ಬದಲಾವಣೆಯಾಗಬಹುದು, ಶಾಶ್ವತವಾಗಿರಬೇಕೆಂಬ ಕಾರಣದಿಂದ ರಾಜರು ತಮ್ಮ ಕಾಲದ ಬರವಣಿಗೆಯ ಗುರುತು ಬದಲಾಯಿಸಿದ್ದಿರಬಹುದು. ಅನುಕೂಲಕ್ಕಾಗಿ ಬದಲಾವಣೆ ನಡೆದಿರಬಹುದು. ಹೀಗೆ ಅನೇಕ ಕಾರಣಗಳಿಂದ ಲಿಪಿಯ ಬದಲಾವಣೆ ಆಗಿದ್ದನ್ನು ಊಹಿಸಬಹುದು. ಎಷ್ಟೇ ಬದಲಾವಣೆಯಾದರೂ ಭಾರತೀಯ ಲಿಪಿಗಳಿಗೆ ಮೂಲ ಬ್ರಾಹ್ಮೀ ಲಿಪಿಯೇ ಆಗಿದೆ ಎಂಬುದು ಬಹುಜನರ ಸಂಶೋಧನೆಯ ನಿರ್ಣಯವಾಗಿದೆ.

**ಪರಿಶೀಲಿತಗ್ರಂಥಗಳು :**


೧) ಅಷ್ಟಾಧ್ಯಾಯೀ ೨) ಅಭಿಜ್ಞಾನಶಾಕುಂತಲಮ್ ೩) ಕೌಟಿಲೀಯ ಅರ್ಥಶಾಸ್ತ್ರ

೪) ಶುಕ್ರನೀತಿ ೫) ಶ್ರೀಮದ್ವಾಲ್ಮೀಕಿರಾಮಾಯಣ ೬) ಶ್ರೀಮನ್ಮಹಾಭಾರತಮ್

೭) ಸ್ಮೃತಿಸಂಗ್ರಹಃ ೮) ತೈತ್ತಿರೀಯ ಕೃಷ್ಣಯಜುರ್ವೇದ


**********